Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४२६५-घ

Title अधिकरण कौमुदी

Author देवनाथ ठक्कुर

Extent ४६ Age

Subject पूर्वमीमांसा . सम्पूर्णम्

नं० ४२७५-घ

अधिकरणकौमुदी

नं० ४२७५-घ

पत्राणि ४९

4275

F. = 49

अधिकरणकौमुदी १५००

अ॰कौ॰
१

श्रीगणेशायनमः पुराणमजरंदेवंकामदंकामवैरिणम्। अनिदानंनिदानंतंभोगिनंयोगिनंनुमः।१। स्त्री
स्त्रेदेवःस्मरपरवशःस्मेरतारुण्यपन्नत्यक्त्रौढोत्तुंगस्तनभरनमत्कामिनीकामकेलिः। शुष्यत्त्सेवापरवशमनाः
किंजगन्नाथपतावद्भावीभावश्चरणकमलेत्तादृकेमामकीनः।२। धर्मशास्त्रेऽधिकरणानांविचारेषूपकारकम्।
विदुषादेवनाथेननिबन्धेननिबध्यते।३। परिसंख्यानियमयोस्तथाविध्यनुवादयोः। भेदकंकथ्यतेस
म्यक्पर्युदासनिषेधयोः।४। प्रसंगतंत्रयोर्भेदस्तत्साहित्यसहत्वयोः। श्रुतिलिंगादिभेदश्चतेषामेव
बलाबलम्।५। विधिश्चबाधसापेक्षःप्रतिप्रसववद्भवेत्। व्यवस्थितविकल्पश्चषोडशिग्रहणादिव
त्।६। ऐच्छिकेष्टविधौदोषोयोगसिद्धिनिरूपणम्। तिर्यग्दर्वीपरिच्छेदोवेदोवेनिगिरागिरा।७। अत्रा
धिकरणंतद्वत्फलंचमसमेवयत्। अर्थवादविशेषश्चफलंतथावैषम्यमेतयोः।८। अश्रुतौतुसमाभा
गःपशूनामंजनादिकम्। विशेषोवैकृतस्तद्वदूहमेधिविधौभवेत्।९। पाशाधिकरणंतद्वत्तथावंक्रिषु
वाजिनः। सर्वशक्तिःकपालानिगवामयनमेवयत्।१०। निषादस्थपतौबीजंहविषामुभयत्ववत्।अ
पेक्षितविधिस्तद्वद्विश्वजित्फलकल्पनम्।११। अर्थवादाद्विधिःक्वापितदाद्यंतापर्ववत्। पशूपाकरे

णं तद्वाद्विधिरंगमुखेन यत्।१२॥ सर्वथाख्यातप्रत्ययस्य प्राये णोदयनीयवत्। श्रुतिस्मृतिविरोधस्य शास्त्रे
स्तत्रं कपिंजलः।१३॥ वाक्यभेदोपि कल्प्येत सूक्तवाकादिवत्क्वचित्। कर्मण्यारंभसिद्धं तत्तत्पदाहवनीय
वत्।१४॥ खलेवालीभवेद्यूपं तथैवानुक्रमेण यत्। तथैव चारुणान्यायः पदं पांशुविवेचनम्।१५॥ सा
मान्यस्य विशेषोक्तौ क्वचिन्न तत्परता भवेत्। पुनरप्याश्रयिन्यायः शंयोरपि विवेचनम्।१६॥ स्त्विम्भ्यश्च
प्रतिनिधेर्विशेषः शास्त्रदेशितः। तथैवाभ्युदितेष्टौ यद्यच्चाग्नेयीपदे भवेत्।१७॥ क्रमाधिकरणं तद्वद्देवता
त्वविवेचनम्। विशेषाणामनंतत्वात्सामान्यविधिकल्पनम्।१८॥ सत्राधिकरणं तद्वदधिकारिबलाब
लम्। संयोगस्य पृथक्त्वेन नानारूपं भवेत्क्वचित्।१९॥ गौणमुख्याधिकरणं यो यज्ञक्रतुः स तद्बलात्।
गुणलोपेन मुख्यस्य लोपो भवति कुत्रचित्।२०॥ आरंभणीयेष्टिनयो वाजिनेषूपकारवत्। आश्विन
ग्रहवत्किंचिद्धि नियुक्तविरोधवत्।२१॥ नातिदेशः क्वचिद्बाध्यः स्तुतशस्त्रनयः क्वचित्। शिष्टको
पादिकं तद्वत्प्रसंगेन क्वचित्क्वचित्।२२॥ स्याप्याश्लिष्टेज्याधिकरणं तद्वत्सूत्रविरोधयुक्। निब
द्धं यन्निबन्धेषु मीमांसासारवेदिभिः।२३॥ निगूढाक्षरयोगेन तत्स्वरूपं निरूप्यते॥ ननु नि

म.कौ.
२

बंधारोनिबंधेष्वधिकरणाविरोधेन तावदितस्ततः प्रत्यवतिष्ठंते तत्राधिकरणं मीमांसासि
द्धांतः स च न वेदवद्बोधकः युक्तिशास्त्रत्वात् युक्तिमूले चाधिकरणस्या किंचित्करत्वं तद्धे
तोरितिन्यायात् सर्वेषां चाधिकरणानां लाघवविरोधविनिगमकाभावादिष्वेव विश्रामात् ते
चात्माश्रयान्योन्याश्रयचक्रकाऽनवस्थाव्याघातप्रतिबंदीविनिगमनाविरहोत्सर्गानौ
चितीकल्पनालाघवगौरवादयः। तत्र स्वापेक्षत्वमात्माश्रयः। अन्योन्यापेक्षत्वमन्यो
न्याश्रयः। तदेवांतरितं चक्रकं। उपपाद्योपपादकयोरविश्रांतिरनवस्था। विरुद्ध
समुच्चयो व्याघातः। स्वस्वीकृतदोषसाम्यं प्रतिबंदी वैकल्पिके वस्तुनि अवधारणाशक्ति
रविनिगमः। बाहुल्यदृष्टस्य बलवत्त्वमुत्सर्गः। लोकमर्यादातिक्रमो नौचिती। सुगमासुगमयोः सु
गममेव बलवदिति लाघवं। विपरीतं गौरवं चेति तर्काः परेषामत्रैव प्रवेशात् तेषां च सर्वतंत्रसा किंचैवं ता

धारणपात १

२

किंचसिद्धांतविरोधोपिकथंदोषोनस्यादधिकरणविरोधवदविशेषात् ।ननुमीमांसायाधर्मविचार
एवाधिकारस्त्वदुक्तक्रमेणैवतद्वारणे ।तदुक्तंतत्रतत्वमभियोगात्स्यात् ।उक्तंचअभियुक्ताश्रयेयत्रय
त्रिवर्गप्रयोजनाः ।तत्रस्वगुणदोषाणांज्ञानेनेधिकृतामताइतिचेत् ।न ।तर्कस्यापितत्रैवाधिकारात्वला
त्ववगमेस्वयोनेपिसर्वविद्यानमूलत्वात् ।उक्तंच ।आर्षंधर्मोपदेशंचवेदशास्त्राविरोधिना ।यस्तर्केणा
नुसंधत्तेसधर्मंवेदनापरः ।किंचान्वीक्षिकीनिरूपणे ।प्रदीपःसर्वविद्यानामुपायःसर्वकर्मणां ।आ
श्रयःसर्वविद्यानांविद्योद्देशेप्रकीर्तिता ।एवंवाधिकरणोपदर्शनमकिंचित्करमितिचेत् ।उच्यते ।
यद्यपिमीमांसातर्कयोर्द्वयोरपिधर्मोपयोगित्वं ।तथापितर्केतदानुषंगिकंवेदार्थविचारादृष्टत्वा
त् ।मीमांसायास्तुतदभियुक्तैवतदर्थमेवतद्वचनात् ।यागादिस्वरूपेतिकर्तव्यताद्यानफलनिरूपणार्थ
त्वात् ।अथातोधर्मजिज्ञासेतिधर्मंप्रतिज्ञानात् ।तदुक्तंधर्मःप्रतीयमानेनवेदेनकरणात्मना ।इति
कर्तव्यताभागंमीमांसापूरयिष्यति ।एवंवाभियुक्तग्रामानेकसंवादार्थमधिकरणोद्भावनं ।

अं०कौ०
३

तद्धि संवादार्थं तद्विरोधोद्भावनमिति न किंचिदेतत्। यदि त्वधिकरणं तर्कः विरुद्धं तदा न तदादरोपि युक्तिशा-
स्त्रत्वात् अन्यथा गुरुमतभट्टमतयोर्विरोधेनाव्यवसायप्रसंगात्। द्वयोरपि तदभियुक्तत्वात्. तद्यथा. स्वा-
ध्यायोध्येतव्य इति विधेः स्वातंत्र्यमध्ययनापूर्वमेवोद्देश्यमर्थज्ञानं चार्थबललभ्यमिति गुरुवचनं: पर-
तंत्रो विधिरर्थज्ञानमनुष्ठानं च द्वयोरपि विध्युद्देश्यत्वमिति भट्टवचनं:। एवं चानंभणीय इदं न गत्वमि-
ति भट्टवचनं:। प्रधानत्वमिति गुरुवचनं:। मनुः। वेदोखिलो धर्ममूलं स्मृतिशीले च तद्विदां। आचा-
रश्चैव साधूनामात्मनस्तुष्टिरेव च। विधिर्विधेयस्तर्कश्च वेदस्तबकैर्मीमांसा। तदुक्तं भट्टेन. मीमांसा-
संज्ञकस्तर्कः सर्ववेदसमुद्भवः। सोनेन वेदानुसारात्मकाष्टादिलवणोत्सवत्। कुमारिलवचनं कः। अ-
खिलो विधिनिषेधात्मा विकल्पतः। अखिलः समस्तो भागान्तराणामपि तत्त्वादिति नारायणः।
चतुर्विध इति तत्वं. अथर्वणोपि तदुपदेशकत्वात्. वेदाश्चत्वारः ऋग्यजुःसामाथर्वणरूपाः। तत्त्वं च
दृष्टार्थकानादिवाक्यत्वं. तादृशं वचनवाक्यत्वं वा। तत्र विवर्जितछंदस्कं तादृशवाक्यत्वं. अविवर्जितछंद-

३

स्वर्कं तद्यनु:। विवक्षितगानं साम· अदृष्टद्वानादृष्टादृष्टफलकमाथर्वणं· सच द्विविधो मंत्रब्राह्मणभेदात्·
उक्तंच· मंत्रब्राह्मणयोर्वेदइति· मंत्रपदं पारिभाषिकं धात्वादिवत्· तत्वेनयाज्ञिकप्रसिद्धिसिद्धत्वं वा तत्वं
तदन्यत्वं ब्राह्मणत्वं। ब्राह्मणोपिद्वेधा· विध्यर्थवादभेदात्· हेत्वादिर्वोधकः उक्तंच· हेतुर्निर्वचनं निंदा प्रशंसा संश
योविधिः। परक्रियापुराकल्पो व्यवधानकल्पना· मंत्रभागेव तदभावात्· अनुवादश्चार्थवादविशेषएव· प्र
योजनापेक्षिणः पुनर्नाभिधानस्यैवतत्वात्· अन्यथावातपुत्रीयत्वापातात्· स्मृतिश्च ऋषिप्रणीतधर्मशास्त्रं· सा
वद्दृष्टार्था अदृष्टार्थोभयार्था च· तत्राद्यानन्नपतीनायानादिस्मृतिः। दृष्टप्रयोजनापेक्षित्वात्। अदृष्टार्था· संध्या
मुपासीत· नकलंजं भक्षयेत्· द्वितीयाद्युभयार्थत्वं यथापलाशदंडधारयेत्। शीलं मनूक्तं। अद्रोहश्चैव भूतानां कर्मणा
मनसागिरा। अनुग्रहश्च ज्ञानं च शीलमित्यभिधीयते। एवं च रागद्वेषपरीहारः शीलमित्यभिधीयत इति ग्राव:।
वेदविदांस्वभावप्रवणोह्यतिनानायणः। आचारन विशेषएवतत्कितिनवीनाः। आत्मतुष्टिरेकत्वानेकोपनिपातःन्य
तमस्मिन्मनस्संतोषइति हलायुधः। वैकल्पिकेर्थेस्वेच्छैव नियामिकेतिमितात्नाकारः। यदुक्तं। एतेन वैदिकाने
कधर्मधीसंस्कृतात्मनां। आत्मतुष्टेः प्रमाणत्वं सिद्धधर्मप्रसिद्धय इति॥ तत्रविधिनसंतमप्राप्तौ नियमः

अ॰कौ॰

४

५

पाक्षिके सति । तत्र चान्यत्र च प्राप्तौ परिसंख्यानमुच्यते । कथमप्यप्राप्तौ विधिर्नज्ञाततज्ञापनस्यैव तदर्थत्वा
त् । यथा सोमेन यजेत । अत्र यागस्यैवाप्राप्तत्वात् । पाक्षिके लाभे नियमः । एकदेशे तदंगत्वनियामकत्वात् । प्रा
प्तैकदेशेनेतिकर्तव्यतापूरणस्यैव नियमपदार्थत्वात् । यथा॰ याजनाध्यापनैर्व्राह्मणो धनमर्जयेदिति तत्र धना
र्जनेषु सामान्यतः प्रवृत्तस्यौदासीन्येन कृषिवाणिज्यादीनामंगत्वं प्रसक्तं । एकोपायप्रसंगे उपायांतराकांक्षाविर
हात् । तत्र श्रुतेर्याजनादीनामंगत्वबोधनं वाक्यार्थः । तत्संबंधबोधपरत्वात् । अर्थादितरत्र निषेधलाभाच्च । अना
नुपेयादित्वादावप्येवमेतत् । समुच्चितनानाप्राप्तौ परिसंख्या । यथा पंच पंचनखा भक्षयेत् । तत्र पंचनखे
भक्षणे तदन्यमांसभक्षणयोर्नैवमुभिभेदेन प्रसक्तावितरनिषेधः परिसंख्यावाक्यार्थः । अत एव पदार्थप
रित्यागोपदार्थकल्पनमभावविधिरित्येते परिसंख्यायां दोषाः । ननु परिसंख्यायामितरनिषेधो वाक्या
र्थो नियमे तु तथा नेति किं विनिगमकं । अन्यथा शशकादीतिक्रमांसभक्षणनिषेधवत् कृष्यादिना ध
नार्जननिषेधस्यालाभे तद्द्वैतुकं धनार्जनमनिषिद्धमेव स्यादिति चेत् । मैवं । वचनवदनिष्टाननुबंधि धनार्जने

४

याजनाद्युपायत्रयसंवंधनियमेज्ञातेयत्रतत्संवंधाभावस्तत्रताहृशेष्टसाधनत्वाभावइतिव्याप्तिवलान्नाहृ
शोपायसम्बंधाभावादेववलवदनिष्टाननुवंधीष्टसाधनत्वाभावावगमस्संभवात्· नचैताहृशव्याप्तिवोधएव
कथमितिवाच्यं· व्युत्पत्तिवलेनसंभवात्।धूमवान्वह्निमानितिवदुद्देश्यविधेयभावसंभवात्।ननुयच्छब्दयोगं
ज्ञापमपंभवेदुद्देश्यलक्षणं।तच्छब्दएवकान्वयस्यादुपादेयलक्षणमितिकथंतदितिचेत्।नाउद्देश्यएवयच्छब्द
योगश्चत्येवंपनत्वात्।नतुतेनविनानोद्देश्यत्वमानाभावात्।प्रकृतेतुनतथा·वलवदनिष्टाननुवंधिभक्षणेप
वनत्वमांससंवंधावगमेपितदन्यमांसभक्षणेशशकादिमांससंवंधाभावेनलिंगेनताहृशेष्टसाधनत्वा
भावावगमासंभवात्।शशकादिभिन्नमांसेशशकादिमांससंवंधाभावस्यासिद्धत्वात्·नत्रादितनवृद्धि
तेकगुड्कभोजनसंभवात्·नचाचाप्यतन्नोदितनोपायाभ्यामेकधनार्जनमसंभवात्·सेवादिकंपुनरुक्तस
घातियहृदानेदानस्यैवासंभवात्।धर्म्मोद्देशेनत्यागाभावात्·मांसद्वयभोजनानुकूलकृत्यैक्यवत्तदुभ
यानुकूलैककृत्यैक्यस्यासंभवाच्चतस्यवाविवक्षितत्वात्।किंवहुनाक्रमतावुपेयादित्यत्रक्रमतुकालगमना

अ०कौ० ५

न्यकालगमनयोनेकदा सर्वथैवासंभवात्· न च तत्र परिसंख्या· ऋतौ नोपैति यो भार्यामनृतौ यश्च गच्छ
तीति वचनेन ऋतावनुपगमेपि पापबोधनेन तदसंभवात्। नन्वेवं व्रीहियवयोरपि नियमविधिर्न स्यात्
तयोः समुच्चयासंभवादिति चेत्· न। विकल्पे द्वयोर्न शास्त्रार्थत्वे नैकस्मिन् फलान्वयासंभवात्। वस्तुतो
व्यवस्थिते नियमपरिसंख्याभेदे तत्र तत्र तदभावेपि तत्तन्नभावाद्विति सिद्धांतकौमुदीविस्तरः। याजनादि
तदन्यवृत्तीनां समुच्चयासंभवात् विकल्पे न हेतुत्वमेव च याजनादिसंबंधे धनार्जनस्य शब्दादवगते
तदुपायांतराभावेर्थादवगम्यते· विकल्पे पनस्य नान्वयायोगात्· परिसंख्यायां तु न तथावगमः· स
मुच्चयसंभवात्· शशशुनोर्मांसे मिलिते कस्यचित् भोजनसंभवात्· तदवश्यं वाक्यार्थस्य व्यवच्छेदः·
गत्यंतराभावात्· न चान्नप्राशने वाक्यद्वयत्वकामस्य भानद्वाजमांसेनेत्यत्रापि परिसंख्या स्यादिति
वाच्यं· तत्र तत्तत्फलोपाधिसंबंधेन विधेनेव स्वीकारात् फलोपदेशमंतरेण परिसंख्यास्वीकारादि
ति दिक्। यत्र साधारणरूपेणोपस्थितमध्ये कस्यचिन्निषेधः कस्यचिदवयस्तत्र परिसंख्या। एवं च नखवि

५

नैवोपस्थितानां शशकादीनामन्वयादितरेषां व्यवच्छेदात् नियममेतेनैवमिति कश्चित्॥ विधिश्चा
ज्ञातज्ञापको वेदभागः। स च सामान्यतश्चतुर्धा। उत्पत्तिविधिर्विनियोगविधिरिति कर्त्तव्यता विधिरधि
कारिविधिश्च। तत्रोत्पत्तिविधिर्धर्मज्ञापकः द्रव्यदेवतासंबंधिस्वोत्पत्तित्वात् अज्ञातज्ञापनमु
त्पत्तिर्विशिष्टविधिरिति कश्चित्॥ विनियोगः शेषत्वमंगत्वमिति यावत् प्रयोग इति कर्त्तव्यताङ्गा
नां क्रम इति यावत्॥ कर्मफलसंबंधबोधनमधिकारिविधिः कर्त्तृशेषश्च विधिरिति यावत्।
विशेषतश्च विधिरनेकधा। क्वचिद्विशेष्य विधिः यथाग्निहोत्रं यजेत क्वचिदन्यव्यवच्छेदकत्वे वि
धिः यथाघारमाघारयति तत्रातिदेशबलादेवाघारादिलाभे पुनस्तदुपादानादाज्यभागादिसक
लस्याग्नीयत्वमाघारस्य कल्प्यते गत्यंतराभावात् अर्थादेनतदवगम्यते ननु शाब्दव्यवच्छेदस्य
थाहृत्वेपरिसंख्यापातात्। क्वचित्संबंधविधिः यथा ऐंद्रं दधि भवति क्वचिद्गुणरूपदेशविधिः य
था सितासिते स्नायात् तत्र स्नानद्वयस्य नित्यवत्प्राप्तत्वेन विशिष्टविध्यसंभवात् गौरवाच्च अत ए

श्र·कौ·
६
6

वद्वहुस्नानामाचरणे प्रापकाभावात् यदि स्त्रीसाधारणार्थं तत्र विशिष्टविधिः अन्यथा स्त्रीणां प्रापकाभावा
त् तद्लाभप्रसंगात् किंच पृथग्विधौ निराकांक्षत्वेन गुणविधानासंभवात् अजेस्वस्नानस्येष्टत्वात् नाजस्त्र
मित्यनेन वाध्युदस्तत्वात् तदाकुंजरच्छायेश्राद्धं दद्यादित्युदाहरणमेतत् क्वचिद्विशिष्टविधिर्यदुक्तं प्राप्ते कर्मणि
नानेको विधातुं शक्यते गुणः अप्राप्ते तु विधीयंते बहवोप्येकयत्नतः तत्र देशविशिष्टस्य यथा गयायां श्राद्धं दद्या
दन्यथामावास्यायामेव तत्स्यात् तत्रैव श्राद्धस्यान्यतः प्राप्तत्वात् शिष्टैः सर्वतिथिष्वेवाचरणात् यदि वा काम्य
श्राद्धं सर्वतिथिसाधारणमेव प्राप्तं तदापि विशिष्टस्य षोडशादिदैवतस्याप्राप्तत्वात्। क्वचित्कारकरूपगुणविधिः
यथा चमसेनापः प्रणयेदित्यप्प्रणयने प्राप्ते गोदोहनेन पशुकामस्येति गोदोहनकरणत्वं विधीयते अगतिकत्वात्। क्वचि
त्कालस्य यथा कुतपे श्राद्धं दद्यात्। क्वचित्कालविशिष्टस्य यथा परपक्षे श्राद्धं दद्यात्। क्वचिद्द्रव्यस्य यथा पुरोडाशे
न यजेत। क्वचिद्द्रव्यविशिष्टस्य कर्मणो यथा सोमेन यजेत न तावदयं गुणविधिः उपदेश्यानुपस्थितेः अत एव
तदुपस्थितौ यागद्रव्ययोः पृथग्विधौ वाक्यभेदापातात् तस्माद्विशिष्टविधिरेवतत् विशिष्टविधौ गौरवा
त्कर्मनामधेयता सोमपस्येति प्रांचः। क्वचित्क्रमस्य यथा दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत।
क्वचिन्नियमस्य यथा याजनादिभिर्ब्राह्मणो धनमर्जयेत्। क्वचिदभावस्य यथा न कलंजं भक्षयेत्
न जीर्णमलवद्वासाः स्नातकः स्यात् इत्यादौ तु न निषेधविधिः सुवाससा भवितव्यमिति

६

विधेस्तत्रमूलत्वेनाजीर्णमलभ्यन्यवासोधारणपनत्वात् नानुयाजेष्वितिवत् अन्यथाविशिष्टनिषेधस्यनूतनम
त्वद्वस्त्रधारणेनावस्त्रत्वेनचपर्यवसानधसंगात्· एकैकसत्वेविशिष्टनिषेधसंभवात्· नाप्येकैकानोप्यमेव
निषिध्यते· वाक्यभेदप्रसंगात्· विशेषणमात्रनिषेधेप्येवमेतत्· क्वचिद्गुणस्यगुणविधिः· यथाव्रीहिर्यूपमनक्ति
तथास्यपुत्रादीर्घायुषोभवंति· अत्रयूपस्यसामान्यतोंजनाभ्येव्रीहित्वविधानात्· एवंवैकविधिर्द्विविधि
र्द्विविधिर्वा· अदग्धदहनन्यायेनाप्राप्तस्यैवविधेयत्वात्· प्राप्तभागश्चतदुपकारकः· भूतभव्यसमुच्चारे
भूतंभव्यायोपदिश्यतइतिन्यायात्· भूतंसिद्धंभव्यंसाध्यं· तयोस्समाहारे· भूतस्यभव्यार्थमुपादित्सस्यैवतस्य
भानात्· शुद्धस्यविधेयभागस्यभानासंभवात्· अप्राप्तोपनागविधायकत्वाद्विधयएवैतइतिकश्चित्·
क्वचित्सापेक्षविधिः यथोभयतिथ्येवमपेक्षषष्ठीसमेतांसप्तमीमुपवसेत्· क्वचिद्बाधसापेक्षविधिः· यथा·
नहिंस्यात्सर्वाभूतानि· श्वेतंछागमालभेत· यत्वत्रविरोधएवनास्तिसाधारणनिषेधवत्वेनागहिंसाया
निषिद्धत्वेपिक्रत्वर्थसंभवोस्तितूपशुवीजादिहिंसांगकत्वेनयागमात्रस्यैवनिषिद्धत्वादितिलिखनं।

१,म
अ०कौ०
८

तन्नुक्तं । प्रधानविधिनोपजीव्येन यागस्य बलवदनिष्टाननुबंधेऽवगते तदंगहिंसायामनिष्टसाधनत्वासंभवात्·
स च विधिः पुरुषार्थः क्रत्वर्थश्चेति द्विविधः । पुरुषार्थत्वं स्वतः फलसाधनत्वं· यथाश्वमेधेन यजेतेत्युक्ते यागस्य
नांगत्वं प्रधानत्वात् । क्रत्वर्थत्वं परांगत्वं· यथाश्वेतं छागमालभेत· आलभनस्य यागांगत्वात्· एवं निषेधोऽपि द्वि-
विधः । तत्र पुरुषार्थत्वं स्वतो नरकसाधनगोचरत्वं· यथागम्यां न गच्छेत्· क्रत्वर्थत्वं परांगत्वमेव· यथा क्रतसं-
भोगं नानिमंत्रयेत्· न चैवं तदाचरणोपापमपि न स्यात्· कर्मणोंऽगभूतस्य निषेधस्य वैगुण्येऽपि तदाचरणस्य पा-
पहेतुत्वे मानाभावात्· न चेष्टापत्तिः प्रायश्चित्तोपदेशवैयर्थ्यापत्तेरिति वाच्यं । अंगवैगुण्ये प्रधानानिष्पत्तौ पाप-
संभवात्· तदेवमतिपीडनेन विधिफलाद्बलवमेव शनरणमित्यलमनेन ॥ ॥ अर्थवादस्त्रिविधः । यदुक्तं·
गुणवादो विरोधे स्यादर्थवादोऽवधारिते· भूतानुवादस्तद्धानादर्थवादस्त्रिधा मतः ॥ गुणवादो यथा· यजमानः
प्रस्तरः· सिंहो माणवकः· अत्र च निश्चलत्वसमर्थत्वादिप्रतीतेः प्रयोजनत्वं· अन्यथा वैयर्थ्यात्· प्रयोज-
नप्रतीतेरेव गुणत्वात्· अनुवादो यथा· अग्निर्हिमस्य भेषजं भूमिर्नावपनं महत्· भूतानुवादो यथा· इ-

८

इंद्रोवृत्रमहनत्‌· सोऽपि चतुर्विधः· निंदार्थवादः स्तुत्यर्थवादः परकृतिः पुराकल्पश्चेति भेदात्‌· आद्यो यथा
तरति मृत्युं तरति ब्रह्महत्यां यो ऽश्वमेधेन यजते· एवं संध्यामुपासते ये तु सततं संशितव्रताः। विधूतपापास्ते यांति ब्रह्मलो
कं सनातनं। अवसीदंती विधिशक्तिरनेनार्थवादेनोन्नम्यते· प्रशस्ते सर्वः प्रवर्तते निंदिताच्च निवर्तते इत्यभिप्रायात्‌·
यदुक्तं· लिङोऽभिधा सैव च शब्दभावना भाव्या च तस्याः पुरुषप्रवृत्तिः। संबंधबोधः करणं तदीयं प्ररोचना चांगतयो
पयुज्यते· प्ररोचना स्तुतिः· निंदार्थवादो यथा· अंधं तमः प्रविशंति ये के चात्महनो जनाः। एवं तैलस्त्रीमांससंभोगी
पर्वस्वेतेषु वै पुमान्‌· विण्मूत्रभोजनं नाम प्रयाति नरकं नृप। तदेतदपि न स्वार्थपरं नापि तु विधिनिषेधस्ताव
कं· न निंदा निंदितुं प्रवर्ततेऽपि तु विधिं स्तोतुमिति भट्टपादाभिधानात्‌। अन्यथा तात्पर्यभेदकल्पनगौरवात्‌।
परकृतिर्यथा· याज्ञवल्क्यस्य आत्रेयीमिति सोवाचेत्यादि परकृतीनां तत्र तत्रोदीरणात्‌· एवं वपामेवाभिघार
यंत्यथ पृषदाज्यं· तद्ध स्म वै चरकाध्वर्यवः पृषदाज्यमेवाभिघारयंति· अग्नेः प्राणाः पृषदाज्यं स्तोममित्यभिवदंती
त्यादिकं व्याहृतमपि परकृतीनामपेक्षितमिति कथितं। पुराकल्पः कल्पांतरीयवचनं· प्रसिद्धमेवैतत्‌· यथा-

अं॰कौ॰

६

8

तस्माद्धा एतेन पुरा ब्रह्मणो वाह्निः पवमानसामस्तोमं स्तोमनयोनेर्यज्ञं प्रतनामहे इत्यादिकं॰ कथमनयोर
नुवादत्वमिति नाशंक्यं॰ स्तुतिनिंदावाक्येनाभिसंबंधादित्यलमनेन॥ ॥अथप्रसज्यप्रतिषेधपर्युदा
सयोर्निरूपणं॥ तत्रप्रसक्तस्य धर्मस्य यत्र निषेधः प्रधानेसप्रसज्यप्रतिषेधः। यदुक्तं॰ विधेर्यत्राप्रधान
त्वंप्रतिषेधेप्रधानता॰ प्रसज्यप्रतिषेधोसौयत्रोत्तरपदेन नञ्। प्रसंगश्चप्रकृतिसाध्येष्टसाधनत्वज्ञाने॰
वैधंरागजंच॰ यथाश्येनेनाभिचरन्यजेतेत्यादौ॰ श्येने साध्यत्वसाधनत्वावगमो विधेरेव बोधकोतनाभावा
त्॰ तदुक्तं न हिंस्यात्सर्वाभूतानीति निषेधः तेन बलवदनिष्टावगमात्॰ अगम्यां नगच्छेत्॰ तत्रसुखविरो
धहेतुताबोधः प्रत्यक्षेणैव॰ प्राप्तविधेरसंभवात्॰ तदुक्तं नगच्छेदित्यनेननिषेधः॰ बलवदनिष्टसाधन
त्वबोधनात्॰ एवंचनिषिद्धस्याधर्मजनकत्वनियमः। साध्यत्वसाधनत्वयोरवगतत्वेननिषेधानन्वयात्।
अन्यथासाधनत्वमादायापिनिषेधापर्यवसानसंभवात्॰ यागादावपिरागजएवप्रसंगस्तदंगेषुवैधः॰
यागेरागादंगवैधीतिसिद्धांतादितिकश्चित्। प्रसक्तिश्चवास्तवीनिषेधांगंनतुभ्रमादिना अप्रतिप्रसंगात्॰

इष्टसाधनत्वाद्यभावमादाय च निषेधस्य चरितार्थत्वे निषिद्धस्याधर्मजनकत्वनियमभंगप्रसंगात् · किंच कृनातथा
सति निःफलत्वकृतसाध्यत्वभ्रमान्निवृत्तिप्रसक्ता विष्टसाधनत्व कृतिसाध्यत्व बोधनार्थं भोजनादौ विधेनापि
प्रसंगादित्यन्यत्र विस्तरः ॥ यत्त्वेवं द्वयोर्नास्तीत्यादावुक्तरूपप्रसंगाभावान्निषेधानुपपत्तिरिति तन्तुच्छं । संदेहसा
धारणज्ञानमात्रस्यैव प्रसंगपदार्थत्वात् । वैदिकेत्वधर्मजनकत्वानुरोधेन तदुदाहरणकत्वात् । यद्वा प्रवृत्ती
वलवदनिष्टाननुबंधित्वभ्रम एव प्रसंगपदार्थः लोकवेदसाधारणः स्वागम्यागमननिष्फलकर्मसाधार
णइति कश्चित् ॥ पर्युदसनीयनिषेधमध्यपत्ते विशेषणं ऽस्तं पर्युदासः । यदुक्तं · विधेर्यत्र प्रधानत्वं प्रतिषेधा
प्रधानता । पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् । असमासेपि न घटः पटइत्यादौ पर्युदासः समासेपि अ
विवादइत्यादौ न तथेत्यौत्सर्गिकमिदमिति शेषः ॥ न घटइत्यादौ समास एव असमानो नाइति कोशानपदस्यापि
तदर्थत्वात् अविवाद इत्यादौ पर्युदास एव अभाववत एवार्थस्यावगमात् अपरस्यैव निषेधार्थत्वादिति नवी
नाः ॥ यथा यजतिषु येयजामहं करोति नानुयाजेष्वित्यत्र तदन्यत्वपरत्वं । अनुयाजव्यतिरिक्तयजतिष्वित्यर्थात् ·

अन्यथा विधिनिषेधयोर्भेदेन वाक्यभेदापातात्। एकवाक्यतानुरोधेन लक्षणानुसरणस्य दृष्टत्वात्॥ अन्यथा गं
गायां घोष इत्यत्रापि लक्षणा न स्यात्। जलपदार्थाधारेणान्वयसंभवात्। तथा अयाजेष्विति तत्रापि पर्युदासः। दर्श
पूर्णमासयोः प्रयाजमुक्त्वा दीक्षणीयादियागेषु तस्याप्रसक्तत्वेन निषेधासंभवात्। तत्र पर्युदासेन प्रयाजान्यत
द्धर्मातिदेशात्। एवं सदृशादिपरत्वेऽपि लक्षणैव। लाघवेनाभावस्य शक्यत्वात्। न च तत्सादृश्यमभावश्च तदन्य
त्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः इत्यनुशासनविरोध इति वाच्यं। लक्षणादिनापि तद
र्थत्वसंभवात्। गुणोऽभुक्त्वादयः पुंसि इतिवत्। नन्वेवं वापीकूपतडागयागभवनं मौनप्रतिष्ठाव्रतं विद्यामंदिरक
र्णवेधनमहादानं वनं सेवनं। तीर्थस्नानविवाहदेवभवनं मंत्रादिदेवेक्षणं दूनेनैव जिजीविषुः परिहरेदस्तंगते भा
र्गवे। इत्यादावपि पर्युदास एव स्यात्। शुक्रास्तादिव्यतिरिक्ते कुर्यादित्यर्थात्। अन्यथा कर्तव्यताबोधकवाक्येन
सम वाक्यभेदप्रसंगात्। एवं शुक्रास्तादावपि कर्मसांगमेव संपद्यते जिजीविषुरित्यभिधानात्। दृष्टदोषपरमि
ति सिद्धांतो न स्यात्। संध्यानाद्योर्न कर्तव्यं सूर्ये चैवादिनोदिते इतिवत् कालवैगुण्यापादकत्वादिति चेत्। अत्राहुः।

पर्युदासस्तावदपवादिकोऽत्राज्ञलौकिकत्वात् · मुख्यप्रवृत्तेः संभवति लक्षणाया अयोगात् · लक्षणा कोशकं च एकवा
क्यताबोधकसमभिव्याहारादिनाऽत्र गंगायां घोषः नानुयाजेष्विति वत् · प्रकरणादेस्तात्पर्यबोधकत्वात् · एवमेवल
ज्ञलौकिकत्वमेतिप्रसंगात् · नचावतथा शास्त्रभेदेन समभिव्याहारादेरभावात् · एवं भुक्तात्तादौ कर्मफलं भवत्येवां
गवैगुण्याभावात् · निषेधस्तु पुरुषार्थो निजीविषुपितृरभिधानात् · अयमेव च पर्युदासप्रसज्ययोर्विशेषः · प्रसज्यप्रतिषे
धे फलं भवत्येव बाधकाभावात्प्रत्यवायजनकमपि भवति निषेधस्यापुरुषार्थत्वात् · पर्युदासे तु फलमेव न भवति अं
गवैगुण्यात् · पापहेतुत्वेमानाभावात् · तदुक्तं · यो नाम कर्तुमध्यस्यः फलं जातीनिभञ्जयेत् । कतोस्तेन न वैगुण्ये
यथा वैदिकसिद्धितः । वस्तुतोऽपत्र निंदार्थवादस्यैव प्रसज्यप्रतिषेधः । तस्याधर्मजनकत्वव्याघातत्वात् · पत्रनना
थातत्र पर्युदासः । नाविधावादिवत् · समभिव्याहारवदर्थवादस्यापि तदेकवाक्यतापन्नत्वबोधकत्वात् ·
निंदार्थवादस्य प्रसज्यप्रतिषेधसमव्याप्तत्वात् · नचैवमेकादशीमुपवसेद्द्वादशीमथवा पुनः । विधिमांव
प्रकुर्वीत न दशम्यामपुत्रोऽधिकविदित्यत्रापि प्रसज्यप्रतिषेधापत्तिः इष्टत्वात् · एवं भुक्तात्तादौ प्रसज्यप्रतिषेध एव ·

१०

मिनी विष्णुमित्यभिधानात् · अनादि देवतां दृष्ट्वा भुञ्जयः स्युर्न भागवि इत्यादि निंदाश्रवणात् । अत एव प्रसक्ते प्रतिषेधः प्रसं
गाद्वैधो नागज श्राध्यत्र पर्युदास इति वृद्धाः । तत्रैव निंदार्थवादसंभवात् । नन्वस्तु वैधत्वं नागजत्वं इति कोऽर्थः नागः फले छा
तज्जन्यमिति यदि तदा श्येनादावपि तत्सत्वं तत्रेष्टसाधनत्वसत्वादिति चेत् · उच्यते · नागः फले छेव तत्सत्वे तस्यो
दृश्यत्वं तदन्वयव्यतिरेकादिना साध्यत्व साधनत्वज्ञानं तदेव प्रसंगः श्येनादौ तु तदभावात् · तत्र लौकिकप्रमाणा
स्येष्टसाधनत्वबोधबोधकत्वादिति न किंचिदेतत् ॥ इदं तु चिंत्यते । नात्रिश्राद्धादावपि कथं न नागजः प्रसंगः यत्किं
चित्फलस्य तत्रापि सत्वात् । अंततो गत्वाभिमानिकसुखवंचनासुखादेर्नापि तत्र भावात् । एवं स्त्रीभूजादीनां वेदपा
ठादावपि तत्सत्वं · तत्रेष्टसाधनत्वसत्वात् । जीविकात्वादिना साधनोपायत्वसंभवात् । तथा हृन्नस्य नागत्वस्य
दुरभिधानत्वादिति चेत् । न । वंचनादिसुखे धनलाभे वा तस्याहेतुत्वात् · सत्यपि श्राद्धे वेदपाठे वा तदभावात् · तत्रा
तनीयकस्य कारणत्वे तस्यावश्यकत्वात् · विषसंपृक्तान्नभोजनगलनलयान्नमरणादिवत् · भोजनस्य मरणहे
तुत्वात् · किं चैवं वेदपाठस्य नागत्रासत्वे स्वाध्यायोऽध्येतव्य इति विधिवैफल्यं स्यात् · दृष्टार्थत्वे संभवत्यदृष्टार्थत्व

10

१०

योगादित्यलमनेन॥ ॥मनुः॥ अधःशायी जटाधारी पर्णमूलफलाशनः। कालमेकं समश्नानो वर्षे तु द्वादशे गते।
रुक्मस्तेयी सुरापश्च ब्रह्महा गुरुतल्पगः। व्रतेनैतेन शुध्यंति महापातकिनस्त्विमे। अत्र सजातीयविजातीयरूपाणां
पापानां द्वादशाब्दनिरस्यानां सकृदनुष्ठितेनैव द्वादशाब्देन विनाशः। तंत्रात्‌ द्वादशवार्षिकविनाश्यानामपि प्रसंगा
त्‌ न तु प्रयोगविध्यैकेन तंत्रत्वं सकृदनुष्ठितानां प्रयाजादीनामाग्नेयादित्रयोपकारकत्ववत्‌। अन्यथैकस्य
नानाफलकत्वे योगसिध्यधिकरणविरोधादिति चेत्‌। मैवं नानोद्देशेन सकृदनुष्ठाने प्रसंगः तंत्रता। तन्निय
ततदन्यफलासिद्धौ प्रसंगः। तद्धेतुश्चादृष्टार्थकर्मण एकजातीयस्य देशकालादीनामेकरूपत्वेनावगमे विशे
षण्यन्यत्वं न तु प्रयोगविध्यैक्यमपि तद्धेतुर्मानाभावात्‌। अनादृष्टेनैव नानाफलसिद्धौ लाघवेन सकृदनुष्ठा
नात्‌। अंगानां तु प्रयोगविध्यैक्यं हेतुरन्यथातिप्रसंगात्‌। प्रयाजादीनामाग्नेयादित्रयोपकारकत्ववत्‌। अ
न्यथा अनंगस्य वा यादनंगव्यवधानस्य चाशास्त्रार्थत्वात्‌। न च योगसिद्धिविरोधः। तत्र फलकामनाभेदे
नाधिकारभेदात्‌ तंत्रासंभवात्‌। अनेकेषामेकक्रियात्मकविनाश्यत्वे तं[illegible]मेव। दशविधपापना

रोदश्यहनाभ्यानवत्। एवं वानप्रस्थापन्नपत्नीश्राद्धस्याष्टकाश्राद्धतंत्रेणैव सिद्धेरिति। न द्वितीयकर्तव्यताभेदाभावात्॥ नि
त्यं च घृतचुषश्राद्धं प्रसंगात्॥ एतदधिकारवचनेऽपि तद्द्वयवचनेऽनावश्यकत्वात्॥ कश्चित्तु आद्यावंते वा सूत्राधिकांगभा
वे प्रसंगेन तु मध्येऽपि अनंगत्वव्यवधानेन हीनांगनिष्पत्तेर्नभावादित्युक्तवान्। तदनयोर्नातिपीडनेन लाघवं शरण
मित्यलमनेन॥ ॥कात्यायनः॥ न योषितः पृथग्दद्यादवसानदिनादृते। स्वभर्तृपिण्डमात्राभ्यस्तृप्तिरासां
यतः स्मृता। अत्र पृथग्दाननिषेधादर्थादपृथग्दानं सिद्धौ साहित्येन सहत्वेन वा प्राप्त्यास्तद्दैवतात्वन्यायापृथ
क्त्वदवैकल्पादितिचेन्न। साहित्यं तुल्यप्रधानत्वं समानरूपाणां पदार्थानां सापेक्षाणामेकक्रियान्वययोग्यत्व
मितियावत्॥ यथा धवखदिरपलाशांश्छिन्धीति तत्र तुल्यवदेव छेदनसंबंधावगमात्॥ अथ वाऽप्रासहत्वं
सप्तदशावराश्चर्त्विजः सत्रमुपासीरन्नितरत्र तेषां गुणमुख्यभावाभावात्। तदेवातुल्यरूपाणां सहत्वं॥ यथाय
त्कुर्यान्नदनपासह॥ तत्र यजमानहविःश्रेपादिरूपो व्यापारः प्रत्यासन्नतया कथं विदग्धावेदनेन तु मत्यादि
दानात्तथात्वात्॥ एवं यजमानब्राह्मणेऽन्यथाविशेषात्। न चैवं तथा॥ पितृपितामहायेत्यादिश्रुतौ निरपेक्षतावगमात्॥

पृथक्त्वपदस्यानुवादत्वात्· योचित्सइत्यत्र तत्रापि तदावश्यकत्वात्· मिलितदेवतात्वे पुंसोपि तथात्वात्। न चाग्नसं
गनिषेधानुपपत्तिः। इह द्विधा द्वन्द्वसमासस्य शास्त्रविशेषनिषेधसंभवात्· वस्तुतस्तु यदासेनयोश्चिदन्यस्य निषेध
संभवात्· पृथग्दानपरत्वमिति न किंचिदेतत्। यत्तु पितृभ्यो दद्यादिति विधिबलात् पुत्राणामेव साहित्येन
देवतात्वं तेन विना बहुत्वान्वयायोगादिति। तदपि न। उक्तश्रुतिविरोधात्· बहुत्वस्य दानरूपक्रियायां च द्विर्वेद्य
न्वयसंभवात्· यत्किंचिदेकक्रियासंबंधस्यैव तुल्यप्रधानत्वरूपत्वात्· तस्यैव साहित्यत्वात्· अन्यथा गर्गाभ्योऽपि गामि
त्यादौ गत्यभावात्· भोजनस्य प्रत्येकपरिसमाप्तत्वेन एकक्रियात्वासंभवात्· ज्ञानेऽपि रूपितं तथात्वस्य तुल्यत्वात्·
यदि चैकजातीयदानसंबंधित्वमेव साहित्यं तदा न दोषः। शंकापीति निरस्तमंगमेतत्। अथ श्रुतिलिंगादिनिरूपणं।
तत्र सूत्रं· श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्। तत्र निरपेक्षो रवः श्रुतिः। अ
र्थप्रकाशनसामर्थ्यं लिंगं· अर्थैक्यावच्छिन्नपदसमूहो वाक्यं· तद्बुवाक्यभावस्य कार्यान्तरापेक्षावशेन वाक्यान्तरसंबं
धाकांक्षापर्यवसितं प्रकरणं· वक्तृश्रोतृबुद्धिस्थत्वमिति कश्चित्· अनेकस्याम्नातस्य सन्निधिविशेषाम्नानं

अं०कौ०

१२

12

क्रमः।योगवलं समाख्येति।यदुक्तं·श्रुतिर्द्वितीयाक्षमता च लिंगं वाक्यं पदान्येव तु संहितानि·साप्रक्रियायाक
थमित्यपेक्षा स्थानं क्रमो योगवलं समाख्या।तत्र श्रुतिर्यथा·व्रीहीनवहंति·व्रीहीणामवघातशेषत्वबोधने द्विती
यायाः क्रियाफलशालित्वरूपकर्मत्वबोधिकाया निरपेक्षत्वात्·द्वितीये तु पलक्षणं·तृतीयादेरपि तत्त्वमवि
शेषात्·लिंगं यथा·वर्हिर्देवसदनं दामीति·अत्र सदनरूपार्थप्रकाशकेन वर्हिःछेदने विनियोगो लभ्य
ते।पत्नत्स्या कांक्षावलात्·वाक्यं यथा·देवस्य त्वा सवितुः प्रसवोश्विनोर्वाहुभ्यां पूष्णो हस्ताभ्यामग्नयेजु
ष्टं निर्वपामि·अत्र लिंगेन निर्वापे विनियुज्यमानस्य समवेतभागस्य एकवाक्यतावलेन देवस्य त्वेत्यादिभा
गस्यापि तत्र विनियोगः।वाधकाभावात्·तदुक्तमर्थैकत्वादेकं वाक्यं साकांक्षं चेद्विभागे स्यादिति·विभागे साकां
क्षत्वमात्रे स्योनं ते सदनं कृणोमीत्यादिमंत्रभागस्य तस्मिन्सीदेत्यनेनाप्येकवाक्यत्वं स्यादित्याद्यपदं तत्र सदन
सादनरूपार्थभेदात्·तावतिभगो वां विभजतु पूषा वा विभजतु इत्यनयोरेकवाक्यत्वं स्यादतोंत्यपदं·तत्रा
कांक्षाभावात्·तदुक्तं·साकांक्षावयवं भेदे परानाकांक्षशब्दवत्।कर्मप्रधानगुणवदेकार्थं वाक्यमुच्यत इति।

१२

त्वन्न गुणभेदप्रयुक्तत्वमस्येति कश्चित् । प्रकरणं यथा· दर्शपौर्णमासाभ्यांयजेतेति विधौ कथंभावाकांक्षायां इडोयज
ति समिधो यजति बर्हिर्यजति स्वाहाकारं यजतीति तनूनपादं यजतीति· इत्यनेन तदेकवाक्यतापन्नेन पंचप्रयाजानामं
गत्वबोधनं पाठवशाच्छ्रुत्यभावात्· प्रयाजस्य नमंगांगिताकांक्षत्वात्· फलानन्वयाश्रुतत्वात्· स्थानं यथ
त्· यथा एकस्य नष्टो दग्धः पञ्चस्यामुष्ये इति तयोः साकांक्षत्वादुभयोरप्यामेव नष्टसञ्जीकरणं । क्रमो यथा· आ
ग्नेयाग्नीषोमीयोपांशुयागाः क्रमेण ब्राह्मणभागे पठिताः मन्त्रभागेपि क्रमेणानुमन्त्रणमन्त्रत्रयं पठितं तत्राा
ग्नेयवैष्णवयोर्द्वयोर्लिंगेनैव विनियोगसिद्धिः दाब्धिरसीति मन्त्रस्य न लिंगं विनियोजकं किंतु यस्मिन्दे
शे ब्राह्मणे उपांशुयागः तत्रैव मन्त्रेप्यस्य पाठ इति क्रमादुपांशुयागानुमन्त्रणेस्य विनियोगः । अग्निष्वपि विशेषा
ध्यवसायकरं इति न्यायात् नवत्रापि विशेषस्य नियामकत्वात्· समाख्या यथा· होत्रमौद्गात्रमनुगोति· अत्र सं
तु निर्दिष्टमिति योगात् होत्राख्यकर्मणि होतुरधिकारः योगरूढेः स्वार्थबोधकत्वात् होता ऋग्वेदी आर्त्विक्
उद्गाता सामवेदी अध्वर्युर्यजुर्वेदी होतायजुस्सामऋग्वेदः क्रमादिति शेषस्वनसान्तं । न च समुदाये शक्तिः प्रमाणा

भावात्। यदुक्तं भट्टेन· पाकं यच्च विनैवास्य कर्तानं प्रत्ययोप्यकः। पाकशिष्टः पुनः कर्ता वाच्यो नान्यस्य कस्यचित्। एतेषां पर
स्परमिलने परस्य परस्य दौर्बल्यं· विलम्बेनार्थबोधकत्वादित्यलं विस्तरेण॥ तत्र श्रुतिलिंगयोस्समाहाने श्रुतेर्ब
लवत्वं· यथा कदाचन स्तरीरसि नेंद्र सश्चसीत्यादिमन्त्रो विनियोजिका श्रुतिः। ऐंद्र्या गार्हपत्यमुपतिष्ठत इति। अ
त्र द्वितीयारूपश्रुतेन मंत्रेणुपस्थानशेषित्वमवगम्यते· तस्य क्रियाजन्यफलशालित्वबोधकत्वात्। एवं तृतीयायाप्य
कृत्यर्थस्य साधकतमत्वरूपस्य शेषित्वं तस्य तद्बोधकत्वात्। तद्वदिन्द्रप्रकाशकस्यैव योग्यतावलात्। एवमैंद्र्येति
विधिवाक्यस्थितादिंद्रस्येति मंत्रस्थितादिंद्रप्रकाशनरूपलिंगादिंद्रस्योपस्थानशेषित्वं· तत्प्रकाशकस्योपस्था
नकरणत्वं· अन्यप्रकाशकस्यान्यत्र विनियोगासंभवात्। तदत्र श्रुतिलिंगयोस्समाहाने श्रुतेर्बलवत्वं·
निरपेक्षत्वात्· तस्य तद्युक्तत्वात्· लिंगस्य श्रुतिं परिकल्प्य तद्बोधकत्वे न तदुपजीवकत्वात्· सर्वत्र श्रुतेरेव वि
नियोजकत्वमिति तदंगीकारात्· शक्तस्येद बोधकत्वात्· श्रुत्यार्थाप्रत्ययानुसारात्। न ह्येनेनैंद्रउपस्थानव्यइ
तिलिंगेन साक्षादवगम्यते किंतु तत्प्रकाशनसामर्थ्यान्यथानुपपत्त्या कल्प्यवृत्त्यवरं श्रुतिकल्पनेविलम्ब

संभवात्· इंद्रपदमिदि परमैश्वर्ये इति धात्वनुसारेण शक्रपरं तेन वाक्येऽपि शक्रपरत्वादाग्नेयीनामेव ऋचां लाभः इंद्रपद
स्य तदर्थप्रकाशनसामर्थ्यात्। ननु ऐंद्र्या गार्हपत्यमित्यत्रैवेंद्रपदमीश्वरपरमस्तु एवमाग्नेय्या गार्हपत्यमित्येवार्थ
स्यादिति चेत्‌ न। व्यक्तिवचनानां सन्निहितविशेषपरत्वेन तस्य कदाचनस्तरीनसीतिमंत्रविशेषपरत्वात्· तस्यैवेंद्रप्रका
शकत्वाद्गार्हपत्योपस्थापने नियोगासंभवेन तदावश्यकत्वात्। लिंगवाक्ययोः समाहारे लिंगस्यैव बलवत्त्वं यथा· स्योनं
ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि। तस्मिन्सीदस्यत्र सदनसादनरूपयोः प्रकाशनरूपाल्लिंगा
न्मंत्रभागयोरुभयत्र विनियोगो लभ्यते योग्यताबलात्· वाक्यबलात्तु मिलितयोरेव सदने सादने वावगमः।
समभिव्याहारे ऐकवाक्यतावगमात्। यत्सदज्ञपेन यत्कल्पयामि तत्र सीदेत्यर्थैक्यात्‌ विभागे साकांक्षत्वात्·
तदत्र लिंगवाक्ययोः समाहारे लिंगस्यैव बलवत्त्वं· तस्य तच्छक्तपदरूपत्वेनोपजीव्यत्वात्· वाक्यस्य तच्छक्तपदसमभि
व्याहाररूपत्वेन शक्त्युपजीवकत्वात्· समभिव्याहाररूपवाक्येन लिंगं परिकल्प्य श्रुतिकल्पनद्वारा अर्थबाधनात्·
एकवाक्यतानवगमे विसामर्थ्यविधानणात्· अवगतसामर्थ्यानां सन्निधिपठितानां पदानां सामर्थ्यबलेन प्रयोजनैक

तयाएकवाक्यत्वावधारणात्।एवं च प्रथमप्रतीताभ्यां सदनसादनसामर्थ्याभ्यां क्लृप्तेन श्रुतिद्वयेन भागयोः प्रत्येकं
नियोगबोधनात्। नैकवाक्यत्वं। विरोधिलिंगाभावेन वाक्यैकवाक्यतासंभवात्। वाक्यप्रकरणयोः समाहाने वाक्य
स्य बलवत्त्वं यथा। इदं द्यावापृथिवी भद्रमभूतामिति सूक्तवाक्ये इदमग्निर्हविर्जुषत इदं सोमो हविर्जुषत इदं प्रजाप
तिर्हविर्जुषत इत्यादौ प्रकरणात् षड्विधयागेषु षुषत्लां मन्त्राणां विनियोगः प्रसक्तो ऽविशेषात् वाक्यबलात्तु प्रत्येकं
प्रत्येकस्याग्न्यादिपदस्य समभिव्याहाररूपवाक्यस्य प्रत्येकमेव तत्वात्। क्वचित्तु इन्द्राग्नी इदं हविरजुषेतामवीवृधेताम
होज्यायोऽक्रातां अग्नीषोमाविदं हविरजुषेतामहोज्यायोऽक्रातां इत्येवंतनवाक्यद्वयमस्ति तत्र पौर्णमास्यामिन्द्राग्नी देवते इति
लिंगात्तत्पदमपनीयते। दर्शे तु समवेतार्थत्वात् युज्यते। तत्र संदेहः इन्द्राग्निपदएकवाक्यतापन्नान्यवीवृधेतामित्येतान्यपि
तत्रापनेयानि अथवा प्रयोक्तव्यानि। तत्र प्रकरणात्तत्पदानपनयः प्रतिभाति। असमवेतार्थत्वेन देवतामात्रापनय
नात्। वाक्यात्तु तान्यपनेयानि इत्यवगम्यते। येन यदेकवाक्यतापन्नं तेन सहैव तदपयौचित्यात्। इति विरोधोदा
हरणं। तदत्र प्रकरणवाक्ययोस्समाहाने वाक्यस्य बलवत्त्वं। निरपेक्षत्वात्। प्रकरणस्य समभिव्याहारसापेक्षत्वात्

14

प्रकरणस्याकांक्षारूपस्य समभिव्याहारं प्रति कल्प्यश्रुतिकल्पनद्वारा तदर्थबोधकत्वात्· एवं श्रीबुधद्वित्रिकेन वाक्येन
समभिव्याहारस्य स्वरूपत्वे सिद्धत्वेनाभिधानसामर्थ्यं श्रुत्युन्नयनं ततो विनियोग इति तृतीयकाले संभवात्। प्रक
रणे तु आकांक्षाबलेन पदानां संबंधोपि कल्प्य इति चतुर्थकाले विनियोग इति॥ प्रकरणस्थानयोः समाहारे प्रक
रणस्य बलवत्त्वं यथा· राजसूये तानाप्रकरणार्थपत्रे दीव्यतीत्यादिनोक्ते देवनादेरभिषेचनस्थाने पाठात् तदंगत्वम
वगम्यते सन्निधिविशेषरूपस्थानबलात्। प्रकरणात्तु सर्वकर्मांगत्वं· बाधकाभावात्· तत्र प्रकरणस्य बलवत्त्वं· उपि
ताकांक्षत्वेन निरपेक्षत्वात्· कथं स्थानेन स्याः इत्याकांक्षायां दुर्बलत्वात्। स्थानस्य सन्निधिविशेषरूपस्याकांक्षां विना
अकिंचित्करत्वात्। आकांक्षासत्त्वे द्वयोरपि विनियोगप्रयोजकत्वात्। एवं सन्निधिविशेषेणाकांक्षामुत्थाप्य प्रकरणप
या श्रुतिकल्पनं। तथा हि· आकांक्षोत्थापनमेकवाक्यत्वं सामर्थ्यकल्पनं श्रुत्युन्नयनं ततो विनियोग इति विलंबसंभ
वात्। प्रकरणेनोत्थिताकांक्षत्वेन प्रथममेकवाक्यत्वस्यैव कल्पनासंभवात्·॥ स्थानसमाख्ययोः समाहारे स्थानस्य

अं·कौ·

१५

बलबलत्वं यथा· उद्धृतं दैव्याय कर्मणे देवयज्यायै इति मंत्रस्य श्रोत्रेण तावद्विनियोगः। तत्रयौ नाऽऽशिको मंत्र इति समा
ख्याबलात् पुनोऽशशेत्रेणैशेषित्वमवगम्यते· दध्योदनरूपसान्नाय्यहोमसन्निधानपाठात् तत्स्रोत्रेणांगत्वं तदेवं
स्थानस्येव बलवत्वं सान्निधानं विना समाख्यायाश्च किं विल्कतत्वात्· सन्निधिपरिकल्पने गौरवात्· समाख्ये
याक्रमेण स्थानादिकमुन्नीय श्रुत्युन्नयने द्वाभ्यां षष्ठकाले विनियोगसंभवात्· स्थाने तु क्रमः प्रत्यज्ञसिद्ध
एवेति कल्प्य ४। तेन प्रथमत एव प्रकरणानुमानं तेन वाक्यं तेन लिंगं तेन श्रुतिः तया विनियोग इति पंचमका
ल एव विनियोगसंभवात्। तदेवमतिपीडनेन तेषां विनियोजकत्वे लाघवमेव शनणामिपलमनेन। तदुक्तं एव
द्वित्रिचतुष्पंचवस्त्वं तन्नयकाभिनं· लिंगादीनां वैषम्यं श्रुत्यपेक्षं प्रतीयते। बाधिकैव श्रुतिर्नित्यं समाख्या
बाध्यते सदा। मध्यमानां तु बाध्यत्वं बाधकत्वमपीष्यते॥ ॥ मत्स्यपुराणे· ततः प्रभृति संक्रांतावुपरागा
दिपर्वसु। त्रिपिंडमाचरेत् श्राद्धमेकोद्दिष्टं मृताहनि। नन्विदमयुक्तं। अयनद्वितये श्राद्धं विषुवद्वितये तथा

१५

संक्रांतिषु च सर्वासु पिंडनिर्वपनाद् ऋते । इत्यनेन तत्रैव संक्रांतिषु पिंडदाननिषेधादिति चेत् । निषेधबाधस्यापे
क्षविधित्वसंभवात् पुनोऽशग्रहणानिषेधबाधश्रुतस्य नयहणाविधिवत् । विकल्पेनैवैव सिद्धांतात् नम्भगौ
नवमनन्यगतिकत्वात् । यत्र तु विषयभेदादिगत्यंतरसंभवस्तत्र न तथा बाधकल्पना गौणत्वात् एवं न हिंस्या
त्सर्वा भूतानीति निषेधबाधपुरस्सरं श्वेतं छागमालभेतेति विधौ द्रष्टव्यं । तदेवमेतद् टीकानेनान्यगतिकत्व
मनंगीकारेण गौणत्वमेव बाधकं दर्शनमित्यलमनेन ॥ ॥अथ प्रतिप्रसवनिरूपणं । तच्च सामान्यतो निषेध
स्य विशेषेणापवादः । यथा न यायात् पार्वणं कुर्वन् ब्राह्मणो यायात् इमानवः इति सामान्यतो निषेधानंतरं अमायां
वा न प्रायस्य चेन्नयज्ञे यथा भवेत् सपिंडीकरणाद् ऊर्ध्वं तस्याः कः पार्वणो विधिः इत्यपवादः तदनिनिक्तस्य पा
र्वणनिषेधपर्यवसानात् । नन्वेवं स्त्रीणाममायां वा स्यादेव पार्वणं स्यात् प्रतिप्रसववलादेवेति चेत् । न ।
प्रसंगविषयस्यैव प्रतिप्रसवगोचरत्वात् स्त्रीणां पार्वणप्रसक्तौ निषेधाभावे प्रतिप्रसवायोगात् । तथा हि
यत्रैव प्रसंगस्तत्रैव निषेधो प्रसक्तौ तदसंभवात् यत्रैव निषेधस्तत्रैव प्रतिप्रसवस्तदंशबाधकरूपत्वादिति

अं०कौ०
१६
16

किं विदेतत्। यदि तु पार्वणो विधिर्नित्यमभिधानादेकस्यैव पुरुषस्य श्राद्धे पार्वणेतिकर्तव्यताबोधकं विष्यं तन
मिदं न प्रतिवत्सरं तदा सूर्योदयं विनानैव स्नानदानादिकाः क्रियाः। अग्नेर्विलङ्घनं नैव कल्पभावश्च लभ्यते इति
निषेधेनाङ्कदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु। स्नानं दानादिकं कुर्यान्निशि काम्यव्रतेषु च। तदुदाहरणं। न च स्व
वंतथापि बाधसापेक्षविधेनस्यको विशेष इति चेत् अस्य विधित्वाभावात्। श्राद्धश्राद्धादिषु निषेधसंकोच
कमाचत्वादिति न किंचिदेतत्। अन्यथा विधपतनकल्पने गौरवात्। तदेव मतिपीडनेन तदुपादाने लाघवमे
वशारणामित्यलमनेन॥ ॥अथ विकल्पः स द्विविधो व्यवस्थितो छिक अ· व्यवस्था यथा उषशाखाकात्य
देशकुलशक्तिभेदादित्यनयत· छंदोगपरिशिष्टे· अन्वौकरणं तोमं च कर्तव्या उपवीतिना। प्राङ्मुखेनैव देवे
भ्यो जुहोतीति श्रुतिश्रुतेः। अपसव्येन वा कार्यो दक्षिणाभिमुखेन च· निरुप्य हविरन्यस्मै अन्यस्मै न हि हूयते·
एवमेकादशे द्वादशे वाह्नि पितानामकुर्यात्। तत्र शाखाभेदादिना व्यवस्थितविकल्पो विषमशिष्टो क्रत्वा
त्रा। अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीति वत्· अत्र तु न शक्यादिना प्रयोगेतिकर्तव्यताक

१६

त्वेन षोडशिनामकग्रहविशेषस्य ग्रहणाग्रहणयोरेकत्र तुल्यवदंगत्वासंभवो विनोधादिनिशक्तिरूपावच्छेदेन व्यवस्थि
तविकल्पादनात्। तदुक्तं द्वितीयाध्याये· शक्त्यपेक्षो विकल्पः षोडशिग्रहणाग्रहणवदिति· न त्वैच्छिकत्वं· तथा सति नि
फले ग्रहणे प्रवृत्त्यसंभवात्· वैतन्वद्वेषसंभवात्· न च फलभूमा एकोद्देश्याति स्तोद्देश्याः षड्यारति वसंभवनिलघुपा
ये गुरोचनानुष्ठानलक्षणाप्रामाण्यप्रसंगादिति। नापि तदंगावच्छिन्नस्य प्रधानस्यैव तथात्वमत एव निबंधेषु षोडशि
ग्रहणवत् फलभूमेत्युक्तमिति वाच्यं· तथाप्यष्टदोषयाहात्· तथाहि प्रमाणत्वाप्रमाणत्वपरित्यागग्रहकल्पनं·
प्रत्युज्जीवनहानाभ्युपगमे च स्यादष्टदोषता· अयमर्थः ग्रह्यो नैच्छिकविकल्पे यदैकोपादानं तदा तद्बोधकविधेः प्रामा
ण्यकल्पनमंगीकृतो प्रामाण्यपरित्यागः यदा तु नत्स्यैवानुपादानं तदा अप्रमाणत्वकल्पनं प्रामाण्यपरित्यागश्च
लोकत्रत्वान्नो दोषाः। एवं परत्राप्युक्तदोषविशेषाः प्रत्युज्जीवनमुपापादनो हानं परीहानः। कश्चित्तु बाधकबाधक
त्वं बाध्यबाध्यत्वं बाधकबाध्यत्वं बाध्यबाधकत्वं चेति चतुष्कं व्रीहियववधियोः प नस्यन्नभिलप्यष्टदोषत्वमिति
फलतोन्नविशेषः। तदुक्तं· एवमेषोष्टदोषोपि यद्व्रीहियववाक्ययोः। विकल्प आश्रितस्तत्र गतिरन्या न विद्यते।
विकल्प ऐच्छिकः युगपदुभयोपादानयोग्यत्वे तस्यैव स्वीकारात्· व्यवस्थितविकल्पे तु न दोषः। विशेषविषयत्वे

अं०कौ०

८

17

नैकविधिनिषेधाभावात्· प्रत्ययनसंबंधाभावात्· तदेवमतिपीडनेनलाघवमेवशरणमित्यलमनेन॥ ॥का
त्यायनः। अमावास्यायां श्राद्धदः सर्वान्कामानवाप्नोति· अत्रयोगसिद्धिन्यायात् एकैकमेवफलसंबंधः· एकैकस्मै
फलायान्येयेकृत्वश्राद्धंक्रियंते सर्वस्यांदर्शपौर्णमासादिवत् योगस्यफलसंबंधस्यप्रत्येकमेवसिद्धिसंभवात्· फ
लांतनस्यनित्यकांन्नत्वादितिकश्चित्· तन्नुयोगसिद्धेर्विशेषापन्नत्वात् पञ्चत्वादिविनिर्दिष्टान्विपुलान्मनसः
प्रियान्। श्राद्धदः पंचदश्यांतु सर्वान्कामानवाप्नुतइत्यादिवचनबलेनात्रसमुच्चयावगमात्· वाचनिकंतदनवताना
त्। तथाहि· सर्वेभ्यइतिसर्वनामपदंबुद्धिस्थवाचकंबुद्धिस्थताचयेनरूपेणतेनैवतदुपस्थापकं· तत्रफलतावच्छे
दकरूपेणैवतत्रतत्रश्रुतत्वात्· एवंचतेनैवरूपेणफलानांयोमिलितोपस्थापकाभावात्· नचानिर्धारितमेकं·
सर्वेभ्यइतिश्रवणात्। यच्चसमुच्चयस्यबोधकंतत्रतस्मादेवमिलितस्यफलत्वावगमेतदवतानासंभवात्।
नचप्रकृतेतदभावः· पञ्चत्वादीतिविशेषोपादानेतदसंभवात्· अन्यथातद्वैयर्थ्यात्। नचप्रत्येकमुपस्थितो
मिलितस्यबुद्धिस्थत्वंभवत्येवेतिवाच्यं। तथाकल्पनेमानाभावात्। फलतावच्छेदकानेकत्वात्· नचफल
नानात्वमेवतदवनावबीजं· अनेकेषांफलानांतंत्रेण एककामनाविषयत्वसंभवात्। दशाऽनावत्। शूलपाणिभि

८

वदेवाप्तिभिस्तथैव लिखेनादिति· तदेवमतिपीडनेन लाघवमेव शमलाभित्यलमनेन॥ ॥मत्स्यपुराणे·सा
मान्यं सर्वभूतेभ्यो मयोत्सृष्टमिदं जलं· रमंतां सर्वभूतानि स्नानपानावगाहनैरित्यादौ सर्वपदस्य नसात्स्वस्यापि
स्वत्वोतजलोपभोगोऽविरुद्ध औपादानिकस्वत्वाविशेषादिति कश्चित्। तन्न। तिर्यगधिकरणविरोधात्। त
थाहि· तिर्यक्पंगुत्र्यार्षेयदेवतानामनधिकारः· तत्र तिरश्चां विशिष्टानसंज्ञाविरहात् पंगोः प्रचरणाभावा
त्। त्रीण्यार्षेयाणि क्रमश्रियोग्यानि येषामंधवधिरमूकानां तेषामवर्जनं श्रवणोच्चारणाविरहात्पुंको
नधिकारः। देवतानाममर्त्यत्वात् विदुषीनां कथमनधिकारः· अथैतन्न्याद्देवतानामनधिकार इति चेत् न· विशि
ष्टस्यावेतनत्वेन विशेष्यस्यातथात्वात्· अन्यथा राजसूयादिफलश्रुतिविरोधात्· किं चैवं घटादेरप्यनधि
कारवाधनप्रसंगात्। तस्मात्स्वयमेवहविस्त्यजति अस्यैवचतदुद्देश्यत्वमिति न संभवति· त्यागोद्देश्यत्वकर्तृत्व
योर्विरोधादित्यनधिकारवीजं· वनवाप्यादित्यागतुल्यमेतत्। नचैकस्य जन्तुसंविधेवोद्देश्यादित्यविरोधः
तुल्यमेतात्· अतएव सत्रेनदक्षिणा· यजमानानामेवऋत्विक्त्वेनाभेदात्· त्यागकर्तुस्तदुद्देश्यत्वविरोधात्· किं च
वस्यतदुत्पन्नस्वत्वं विनियोगासंभववत्तस्यैवोद्देश्यत्वे स्वस्यतदभावात्प्रागपिस्वत्वसत्वात्। अस्यानुद्देश्यस्या

णोपादानिकं स्वत्वमिति चेत्· स्वल्पके स्वोपादानादर्शनात्। किं चैवं सत्रेऽपि दक्षिणा स्यात्· एवं तत्र न दक्षिणेति
प्रलापः स्यात्· वस्तुनो नामयोस्तुल्यत्वं यागादावेवं द्रव्यादीनां स्वत्यागे स्वोद्देश्यत्वबोधकाभावात्· वाप्यादौ सर्व
पदस्य रसेन तदवगमात्· दक्षिणादानं तु न दृष्टान्तः तत्रौपादानिकस्वत्वबोधकाभावात्· संप्रदानत्वस्यैव सम्भ
वात्· वाप्यादौ च तदावश्यकत्वात्· देवतादीनां स्वत्यागे स्वोद्देश्यत्वबोधकाभावात्· अन्यथा तदनधिकारिणां
न कल्पनागौरवात्· नृदेवमतिपीठेन लाघवमेव शनणाभिसलमनेन॥ ॥ व्रतलक्षणं· फाल्गुनादितृ
तीयायां लवणं यस्तु वर्जयेत्। व्रतान्ते शयनं दद्या — पस्कनान्वितं। संपूज्य विप्रमिथुनं भवानी प्रीयतामिति· गौ
रीलोके वसेत् कल्पं सौभाग्यव्रतमुच्यते। अत्र तृतीयाव्रतान्तरधर्म्मातिदेशात्तदुक्तकालादिलाभ इति कश्चित्।
तन्न। तृतीयाव्रतानां सधर्मकत्वेन विनिगमकाभावात् दर्वीहोमवदनतिदेशात्· दर्वीपात्रविशेषलक्षकर्तृको होमो
दर्वीहोमस्तथा चातिदेशः क्वचिद्वाचनिको यथा· समानमितरं द्रव्येन· क्वचिन्नामिकः· तन्नामकत्वेनैव तद्ध
र्मातिदेशात्· गौणपदप्रयोजनार्थेनाभावात्· कौण्डपायिनामयनेऽग्निहोत्रपदवत्· तत्र तल्लाभार्थमेवाग्निहो
त्रपदप्रयोगात्· क्वचिन्नैयायिको निर्देशः। तथाहि प्रकृतिवद्विकृतिर्नित्यनेनव्याकृतो धर्मो विकृतावति

दिश्यते साकांक्षत्वात्। तत्र च न सर्वस्याः प्रकृतेर्द्धर्म्मः सर्वविकृतावतिदिश्यते तिप्रसंगात्। किंतु ययोः प्रकृतिविकृ
त्योः सौत्यं तत्प्रकृतिधर्म्मस्य तद्विकृतावन्यथातिविनिगमनासंभवात्· यथापार्वणधर्म्माणामेकोद्दिष्टे तिदेशः॥८·
प्रमीतोद्देश्यकत्वस्य तुल्यत्वात्· तद्गानां यावाह्नादीनामेकोद्दिष्टादावप्रसक्तानामनिषेधापत्तेः प्रकृतिविकृतिभा
वस्य तत्र संजकस्यावश्योपगंतव्यत्वात्। दर्वीसाध्यहोमेषु न तथा· होमानां तत्र समानधर्म्माभावात्। मेयत्वादेर्थानुष्ठा
नातंत्रत्वात्· होमत्वादेरपि नानाहोमसाधारणत्वेन विनिगमकाभावात्। नानाहोमानां तत्र होमत्वेनैव होमस्य
भुद्दस्यैवानुष्ठानमेवं प्रकृतेरपि वह्निनां सधर्मकत्वेन विनिगमकाभावेनातिदेशाभावात्· तद्दतिनिक्तकल्पने मानाना
भावात्· गोत्रवाद्यनतद्धर्म्मसंबंधः॥ तदेवमतिपीडनेनैलौघ्यमेवशरणमित्यलमनेन॥ ॥मत्स्यपुराणे·
ततोवतीर्य शुचये पूर्वमर्द्धं निवेदयेत्· आत्विग्भ्यो यनमर्द्धं च दद्यादुदकपूर्वकं॥ अत्र मध्यांशमेकैकमेव दानं
न तु मिलितोद्देश्यकं पाणिषदधिकरणविरोधात्। तथा हि· मिलितानामुद्देश्यत्वमेकैकमेव वा· नाद्यः· मि
लितानामचेतन्येनास्वीकर्तृत्वात्· स्वीकारद्वारा संप्रदानस्य कारकत्वात्· प्रत्येकं च स्वीकर्तृत्वसंभवेपिच

अ॰कौ॰

१८

19

तुस्तथानुद्देशात्। तत्स्वीकारनमात्साध्यतदुद्देशेनत्यागस्य स्वास्वत्वनिवृत्तिपरस्वत्वोत्पत्तिहेतुत्वात्· यदिवानस्याक
स्वीकारापेक्षा सम्प्रतिपत्तिकस्यत्यागस्यैवदानपदार्थत्वात्· प्रतिपत्तुस्तत्कालीनानुमतेनैव कारकत्वं प्रयोजकत्वा
त्। तदभावेपि मिलितेतु तदभावादिति· तन्न। ग्रहं सम्मार्ष्टीत्यत्र ग्रहतइति ग्रहोयुत्तपात्रं तेषां सर्वेषामेव ग्रहत्वेनो
पस्थितानां सम्मार्जनान्वयत्वावदस्ति। आकांक्षानुरोधेन एकत्वस्याविवक्षितत्वात्· अनुपादेयसंख्यात्वात्·
उपादेयसंख्याया एवतथात्वात् बाधकाभावात्· तस्योपादानार्थत्वात्· कपिंजलानितिवत्· नत्वनुपादेयसंख्या
पितथा· फलसंबंधादिमात्रपरत्वात्· वस्तुतउपादेयं विधेयमनुपादेयमुद्देश्यं तत्संख्यानविवक्षिता स्वर्गकामइत्या
दिवत् केनचित्कामनात्वादिनोपस्थित्यावश्यकत्वात्तत्परत्वमावश्यकमेवं च एकत्वादिसंख्यायाः पुंस्त्वादिपरत्वे
वाक्यभेदापत्तेः· नचिदं विधेयेपितुल्यमितिवेल्· न· विशिष्टस्यैवविधिगोचरत्वादितिकश्चित्। एवं चमति
केनोपस्थितानां त्रयोदशानांदानाचयाभवेत्स्वत्वत्वनवच्छेदेनैवोत्पद्यते· साधारणाधनेष्वाविभक्तेसा
दवत्। नतुविभागशः· विभागानां प्रागकरणात्· स्वत्वसंकोचाय प्रातिस्विकस्वत्वानतोत्पादायवाविभागदशा

१८

नात्। ननुस्वत्वपर्यवसितपर्यंतस्य विभागफलत्वादर्शनात्· किंबहुना यस्यैव यत्र स्वत्वं न तत्रैव तदजपातो माना
भावात्· किंच संसर्गोन्न च विभागो सर्वांशे सर्वस्वत्वस्यावश्यकत्वात्· सद्भूनं तवेत्य ह्येव संसर्गपदार्थत्वात्। अन्यथा
तदसंभवात्· इदंत्ववधेयं· कथं वित्ताधानलोधनेष्वज्ञपाते धनांतरे पि विभागः सिध्यतीति स्थालीपुलाकन्याया
त्· पुलाकोभक्तसिक्थं· तथाहि· स्थाल्यामेकस्मिंस्तंडुले पुलाका संभवे सर्वेषामेव तथात्वमविशेषादिति प्रांसः
पुलाकस्तुच्छधान्यं· पुलाकस्तुच्छधान्येतु पुलाकोभक्तसिक्थके इत्यभिधानात्· तथाच स्थाल्यामेकपुलाकोक्रमे
सर्वस्यैव तथात्वमिति तदर्थ इति कश्चित्· नचैवंपनिषादिदत्तमदत्तमिति प्रलाप इति वेत्। न। बाधकाभावे तदव
तारात्· बहुसंप्रदानकदानस्य नानास्मृतिषु दर्शनेन तदनुरोधेन विशेषावश्यकत्वात्· किंच बहुसंप्रदानकदा
नेयत्र विभागवैषम्यं· तत्रादातैव दातुस्तथाशयः प्रतिग्रहीतॄणामपि तथैव स्वीकारात्· तादृशविभागं विनादान
न निष्पद्यत इति तदधिकरणतापर्यात्· अन्यथा दृष्टार्थत्वे संभवत्यदृष्टार्थत्वकल्पनागौरवात्· तदेवसर्वतोपि
डनेन लाघवमेव शरणमितपलमनेन।। ।। जाबालः। संक्रांतेः पुण्यकालस्तु षोडशोभयतः। कलाः। चंद्रसूर्योप

नागेनुयावद्दर्शनगोचरः। ननु दृशेश्चानुपस्थानशक्तत्वात् तत्काल एवाधिकारो भवेत् न तु मज्जनादिकालेपीति
चेत्। न। उपक्रमदर्शनपदार्थबोधेन गोचरपदस्य तद्योग्यतापरत्वात्· वैदोष्ठ्यादर्शनादित्तिन्यायात्· तदर्थः· प्रा
य उपक्रम एव वेदपदर्शनादुपसंहारेऽपि ऋक्पदादिकं वेदपरमेवोपक्रमानुरोधात्। तथाहि। त्रयो वेदा अजायन्त
इत्युपक्रमस्य वेदपदं न वेदनाजनको विधिभाग उच्यते तदनुरोधादुपसंहारेऽपि· उच्चैः ऋचा क्रियते उच्चैः सा
म्ना उपांशु यजुषा उच्चैर्निगदेनेत्यत्र ऋग्यजुःसामपदैरपि विधिभागाभिधाने· तस्य वक्तृत्वसंभवात्· ऋ
गाद्याम्नानात्· कर्मपक्षाणि ऋगादिपदानि· तज्ज्ञानांगीकारात्· निगदः संबोधनार्थयजुः। न च वेदपदस्य
च ऋगादिपरत्वमिति वेपनीत्यमेवास्त्विति वाच्यं· वेदपदस्य प्रथमोपस्थितत्वेन स्वार्थपरत्वात्· तस्मि
मनुपपत्त्यभावात्· अन्नाधिकरणे विशेषश्च वक्ष्यते· तदेवमनतिपीडनेन एकपरत्वलाघवसंवलितमुपाधि
तिलाघवमेव शरणमित्यलमनेन॥ ॥शावे पंचमात् सप्तमाद् ऊर्ध्वं मातृतः पितृतः क्रमात्। सपिंडता निव
र्तेत सर्ववर्णेष्वयं विधिः। ननु सपिंडपदस्यैकपिंडपरत्वे तिद्यसंगात् सामान्यतमत्वमुपाधिरित्येव शंक्यं वाच्यं

तदेवमष्टमादीनां सापिंड्यनिषेधे सिद्धे ऊर्ध्वमित्यादि वैफल्यमिति चेत्। न। नग्निकागिवेति ब्रूयादे
वं रूत्वोपगायन्ति इति वत्संभवात्। तथाहि। निग्निका गिका ब्रूम इति मंत्रे एवं कृत्वे स्तत एव मंत्रे तस्यान्यथा
पाप्यु सिद्धो नग्निकागिनेत्यनुवादस्तद्वद्वाधिन्यायवलल्लभ्यानुवादत्वसंभवात्। अन्यथार्थान्तरतात्पर्यान्त
रकल्पनेगौरवात्। तदेवमतिपीडनेनलाघवमेवशानणामित्यलमनेन॥ ॥ब्रह्मपुराणे। अथ भाद्र
पदे मासि कृष्णाष्टम्यां कलौ युगे। अष्टाविंशतिमे जातः कृष्णोसौ देवकीसुतः। तस्मात्सन्तत्र संपूज्यो य
शोदा देवकी तथा। गंधैर्माल्यैस्तथा धूपैर्यवगोधूमसंभवैः। सगोनसैर्भक्ष्यभोज्यैः फलैश्च विविधैः पृथ
क्। रात्रौ प्रजागरः कार्यो नृत्यगीतसमाकुलैः। अरुणोदयवेलायां नवम्यां वनिताः स्त्रियः। नयंति प्रति
मां घासां नानाविभवसंभवाः। नदीतीरं शुभं रम्यं विविक्तं वामसत्तमः। ततः स्नानं प्रकुर्वंति स्नाप
यंति व्रतास्ततः। ततः प्रविश्य च गृहं पनाद्रं भुंजते वनिताः। पुरुषभिन्नं विकाने थमधासपमनिवेशत्वपा-
नन्वधिकारिविशेषाश्रवणात् स्त्रीणां च पारणविशेषोपदेशात् स्त्रीणामेवाधिकार इति न पसंहारान्

अं०कौ०

२१

21

क्राधिकरणानुरोधादितिचेत्। न। विशेषात्। तथा हि। अक्ताः शर्करा नाजुहोति तेजो वै घृतमिता
देयघपिड्वद्व्यत्वेनैवं जनसाधनत्वं तथापि घृतस्यैवतत्त्वमवगम्यते उपसंहारादित्येवमेतत्। प
नेनुतत्रतथैव घृतस्तुतेनानन्यथासिद्धत्वात्। फलांतराभावात् प्रकृते तु न तथा। आधिकानि कल्प
नावसरे स्त्रीपुंससाधारण्येनैव कल्पनात्। नेनोवायदिवा मानीत्यभिधानाद्य। उपसंहारानुरोधेन
योगविशेषस्य स्त्रीनिष्ठाधत्वावगमात्। अन्यथा स्त्रीमात्राधिकारोपि न स्यात्। विधवायां मधुमां
जननिषेधात्। एवं सर्पेणाजुहोतितेन ह्यत्र हु घृतइति श्रुतो तेनेत्यनन्यथासिद्धहेतुमार्गदस्त्वना
सात् तस्यैवहोमांगत्वमन्यथातदभिधानवैफल्यादिति सिद्धांतः। एवं वैदोवे त्य धिकरणे विरोधइत्य
पिनिरस्तं। अनन्यथासिद्धस्तुतिविरोधेन तदवतारात्। तदेवमतिपीडनेनानन्यथासिद्धस्तुतेस्तत्सम
तालाघवमेव शरणमित्यलमनेन॥ ॥शातातपः। वशिष्ठोक्तो विधिः कृत्स्नो द्रष्टव्यो त्र निरामि
षः। अतश्चपर्व प्रवर्त्यामि विशेषइतियो भवेत्। ननु पिंडेमधुनश्चामिषत्वे पिंडां श्चदधिमधुकानित्यादि

२१

नापि पिंडे मधुविधानात् तस्य स्वश्राद्धशेषकर्तव्यत्वात् श्राद्धेपि फलत्वमस्त्वविदिति चेत् । न । वैषम्यात् । फलत्वमस्म
स्मै भक्तं ददातीत्यनेनव स्पष्टो स्त्व ... स्य चमसस्य क्रत्विग्भक्षत्वं विहितं तत्र प्रतिपत्तिरूपं परिशेषात् । प्रतिपत्तिर्हि
मशेषस्येति चमसस्य होमद्रव्यत्वसत्वात् प्रकृते तु पिंडस्य श्राद्धशेषद्रव्यत्वेन श्राद्धे पिंडसजातीयद्रव्यकत्वमायातु
न तु पिंडविशेषणीभूतद्रव्यकत्वं मधुना विनापि पिंडसंभवात् । ननु ज्योतिष्टोमे सोमद्रव्यकत्वेन व्यवस्थिते पित्राद्युत्पत्तिक
र्तके तस्मिन्नैमित्तिके नवमसेन सोमबाधवत् नैमित्तिके न मधुना श्राद्धद्रव्यं तन्नबाध इति चेत् । न । उक्तोत्तरत्वात् ।
मधुनो द्रव्यांतरविशेषणत्वेन प्रधानद्रव्याबाधकत्वात् । भवति च मासिकस्य प्रदशत्वेन षोडशत्वबाधः । पुंश्चेतर
न्यथा यागे द्रव्यांतरकल्पने गौरवात् । तदेवमतिपीडनेन विशेषाभिधानसंवादिलं तल्लाघवमेव शरणमित्यलमनेन
॥ ॥ देवलः ॥ तिलान् प्रविकिरेत्तत्र सर्वतो बंधयेदजान् । असुरोपहतं तद्धि तिलैः शुध्यत्यजेन च । न ह्यजे
नेत्येकवचनादेकाजबंधनमिति चेत् । न । अंगानि तिविधिविरोधात् । अजेनेत्यस्य फलसंबंधमात्रपरत्वेन
तुल्यानुवादरूपत्वात् । एकं वृणीते द्वौ वृणीते त्रीन्वृणीते न चतुरो न वा पंच इतिवत् तत्र नानाविधो गोनवा ॥

त्री नित्यत्वविधिर्नैके मित्यादौ । अवयुत्यपथ्यक्तृत्य तदेकदेशानुवादः त्रयाणां मध्ये एकस्यादेव प्यनुप्रवेशात् ।
एवं क्वचिदर्थवशप्राप्तस्यानुवादः । यथा होमं कृत्वा निर्वपेत् । न च होमपदेन वज्रे पलाभे त्रेपौ वाह्नि न्नत्यागस्य
व होमपदार्थत्वात् अन्नो र्थप्राप्तानुवादो निर्वपि रागतिकत्वात् । यथा वाहिताग्नेयोग्राकाशावच्चपि वेदशानितत्र
प्राकाशत्वित्वेन संबंधो ध्रुर्योविधीयते चतुर्थी विभक्त्तनुरोधात् स्वत्वेन दानजन्य मित्याद्रेपजन्ये दाने दत्तानीत्य
नुवादः । यागेण्यक्रनएणेस्वसामा यतएव आव्हित्पद्यत्वादनुवाद इतिकश्चित् । क्वचिन्निषेधानुवादः । यथाम
कृथ्यनुर्भवति अध श्रियावेमाषाः तत्रविरोधविधेनैवेतननिषेधप्राप्तौ अध श्रियाद्यनुवादः सर्वथानुपा
दानपन्त्वात् । क्वचित्प्रज्ञप्राप्तानुवादः पञ्चप्राप्तिश्चैकदेशप्राप्तिः । यथा ब्राह्मणनामेकपिंडस्वधानामा
समन्यथा त्रेचादीनां चतुर्थ्यादिष्वपि पिंडप्रवृत्तिप्रसंगात् । तस्मात्सामान्यविधावेकदेशप्राप्तो नूद्यते
तेषांपापाधिक्यप्रतीत्यादेः प्रयोजनत्वसंभवात् । तदेवं यथा यथं लाघवादिकमेवशरणमित्यलमनेन ॥ ॥

ज्योतिषा। एकेनैकं दिनं साध्यं द्वितीयेन दिनत्रयं। तृतीयेन च सप्ताहं यजेदाकालवर्षणात्॥ न त्वेकदिनं ह्यपि
नमेवज्ञातं न दिनं। न च तद्दिन दूषकत्वेन दूष्यत्वासंभवः। तद्दिनावच्छिन्नवर्षणस्य दूषकत्वात्। एकेनैकादिवसा
वच्छिन्नवर्षणोपलक्षितादिनिषेधेनो द्वितीयेन दिनत्रयमित्यादौ विध्यनुवादवैषम्यापातात्। तथा हि। अप्राप्तप्रा
पणं विधिः। प्राप्तस्य पुनरभिधानमनुवादः। न चैकत्वोभयसंभवो विनाधात्। प्राप्तत्वाप्राप्तत्वयोरेकत्रासंभवा
त्। एवं च दिनत्रयमध्ये तृतीयदिनस्य प्राप्तत्वं विधेयमप्राप्तत्वात्। प्रथमद्वितीययोस्तु अनूद्यत्वं। तद्दिनदू
ष्यत्वस्य प्राप्तत्वस्य प्राप्तत्वात्। न चैकस्मिन्नपि रूपभेदेना विनाशः। तद्दिनत्वेन प्राप्ताप्राप्तत्वेनान्तर्भावादि
ति वाच्यं। तथा सति विधिनिषेधयोरप्येकत्र रूपभेदेन संभवात्। किं चैवं वैषम्ये तस्याभिधानस्य चला
पत्वप्रसंगात्। सर्वत्र रूपभेदप्रसंगात्। एवं विधिस्पृष्टे निषेधो नत्यादि चलापएव भवदिति न किंचिदेत
त्। न त्वेकस्यैव शब्दस्याप्राप्तभागे विधायकत्वं प्राप्तांशेऽनुवादकत्वं बाधकत्वं वोभयांशेऽप्येकेनैव रूपेण
सामग्रीसत्वात्। न हि बाधकत्वमेव विधेयत्वमतिप्रसंगादित्याह इति चेत् न। प्राप्तांशे विधेयानुपपत्ति विधेला

अ०की०

२३

त्पर्याभावेनबोधकत्वासंभवात्।अन्यथाभोजनादावपिविधिप्रसंगः।तुल्यत्वात्·ननुभोजनादावपि
येनष्टादिस्तदन्यत्वेनविधेयत्वं·तद्भिन्नसाधनत्वेनप्राप्तावपिफलांशेतत्साधनत्वेनाप्राप्तत्वादितिचेत्।न।
तत्रापिविशेषणांशस्यैवनत्वात्·यत्रानुवादस्तत्रनविधिसंभवः प्राप्तप्राप्तिविरोधात्।अंशभेदेना
विरोधेपिन्नत्स्वभावादितिकश्चित्।नन्वेवमपिवृष्ट्युधिकनादिनस्यादुष्टत्वंस्यादितिचेत्।न।इष्टत्वादि
तिकश्चित्·वस्तुतोदंडापूपन्यायेनतस्यापिदुष्टत्वात्·यथादंडसंबंधेनापूपस्यदुष्टत्वेदंडस्याहुतनोदु
ष्टत्वं·अन्यथातत्संबंधेनाप्यतत्वायोगात्।किंबहुनाकैमुतिकन्यायस्याप्यवतानसंभवात्।तत्संबंधे
नान्नन्दिनमपिदुष्टंकिमुततद्दिनमिति·किमुतेतिविकल्पापादने·तदेवमतिपीडनेनाघ्राणभागस्या
विधेयत्वेनैनाद्वेवमेवज्ञानाणामित्यलमनेन॥ ॥मनुः॥सर्वेषामर्द्धिनोमुख्याद्वितीयास्तुतदर्द्धिनः।
तृतीयिनस्तृतीयांश्चचतुर्थांश्चैकपादिनः।ननुगोशतेषोडशानामृत्विजांमध्येअर्द्धादिदानमुक्तंविशेष
श्चनोक्तस्तत्कुतोव्यवसायइतिचेत्।न।विशेषानुक्तौसमभागोचित्यात्।समंस्यादश्रुतत्वादितिन्यायात्

२३

23

वैषम्ये मानाभावादतिप्रसंगात् संख्यावैषम्यकल्पने गौरवात्। ननु दर्भादीनां पंक्त्यां शब्दादिरूपाणां सम
विभागासंभव इति चेत्। न। अर्द्धशब्दस्य विषमांशेऽपि साधुत्वात् पुंस्यर्द्धोऽर्द्धं समेंऽशक इत्यनुशासनस्मर
णात्। एवं चार्द्धपदमष्टत्वा निःशङ्कोपन्यसनं कार्यं। द्वादश द्वादशाद्येभ्यः षट् षट् द्वितीयेभ्यः चत्वारश्चत
स्तृतीयेभ्यः तिस्रस्तिस्रः परेभ्य इति कात्यायनस्मरणात्। तदेवमतिपीडनेन लाघवमेव शरणमाश्रि
त्यलमनेन॥ ॥याज्ञवल्क्यः। या दिव्या इत्यर्घमुत्सृज्य दद्याद्गन्धादिकं ततः। वस्त्रोत्तरं गन्धधूपं दत्वा
संस्रवणानि च पितृपात्रे निधायाथ न्युब्जमुत्तानतो न्यसेत्। अत्र प्रथमे पितामहार्घजलशेषस्य
पितृपात्रे प्रक्षेप इति कश्चित्। तन्न। पशूनक्तीति वचनाहूतिकक्रमाविरोधात्। तथाहि पशूनक्ति
पशून् प्रोक्षति पशूनालभेतेत्यत्र पशूनामेकजनक्रियासंभवात् च्छेदैव सप्तदशानां पशूनां नियाम
कान्तराभावात् तत्रथैव प्रोक्षणालभनादितत्प्रथमप्रवृत्तिक्रमस्यैव क्रमनियामकत्वात्। किं
बहुनाऽपदार्थानां क्रमानुरोधाद्विपदार्थानुसमयस्यैवावश्यकत्वात्। एवं चात्रापदार्थानुसमय एवेति

अं०को०

२४

24

कोऽननुसमयपक्षत्वे एकस्यैवांशुभुजनानां मुञ्जगला लमनानंतरमपनस्यतानिस्युनिमि प्राह्निकक्रमोदाहर
णं तन्नस्यादेवमिति न किंचिदेतत् । तदेवमतिपीडनेनापर्यवितिलाघवमेव शनैः त्वमिल्पलमनेन ॥ ॥
विष्णुः । वैश्वदेवादन्नादुद्धृत्य पर्युक्ष्य स्वाहाकारेण जुहुयात् । न च तत्र होमविधानात् सकलहोमधर्मानति
देशादिति चेत् । न । प्रकृतिवद्विकृतिरिति नियमात् देशावलादेव होमधर्मप्राप्तौ पर्युक्षणविशेषोपदेशस्यानुवाद
नव्ययवच्छेदपरत्वात् । नन्वेवमपि मुपक्रम्य होमधर्मकथनादन्याविवक्षोऽनेन दिनाभोजनेऽपीति प्र
प्राप्तप्रापकत्वमिति चेत् । न । होमाधानसामान्यमुपक्रम्य जलाग्न्योर्युगपद्धर्मबोधनात् । किंवा
जुना स्वाहाकारेण नित्यस्यत्यागस्य वह्नेदार्पत्वमेव · तन्नाभावात् : तथा हि वैकृतो विशेषोपदेशा
प्राकृतं कंचिद्धर्ममन्यथयति : विशेषोपदेशबलात् · यथा शरमयं बर्हिर्भवति · तच्चातिदेशबलात्
कौशं बर्हिः प्रसक्तो विशेषतः उपात्तं तदन्यथयति · मन्यथा नैवेयर्थ्यात् : कश्चित्तु पतिव्रतापर्युक्षणानुकूपात् ·

२४

तत्र विध्यभावात्. पर्युदासोप्यत्र विध्यर्थकपदाभावात्। विशेषोपदेशबलेनांगांतरव्यवच्छेदात्. कश्चित्सर्वस्या
नेतदेव विधत्ते. गृह्णमेधिवत्. गृह्णमेधिनिष्टि विशेषस्तत्राज्यभागौ जुहोतीति श्रुतिमित्तितत्रापि दर्शबला
देवदर्शधर्मग्रहस्याज्यभागनामकहोमस्य प्राप्तत्वात् विशेषाभिधानं तस्यैव सर्वोपकारकत्वं बोधयदं
गांतरव्यवच्छेदकमन्यथानर्थक्यात्. यथा वाज्याघारसमाघारान्यजति तत्राघारनामकहोमस्यापि दे
शबलादेव प्राप्तावाज्यभागादिहोमस्यापि न द्विधानमेवतद्रूपोन्यथा तदुपादानवैयर्थ्यात्. आघारमय
तीत्यस्य विध्यर्थत्वमेवं इंद्रायेभवतीतिवत् अन्यथापूर्वकल्प्यसंभवात्। कश्चिन्नु पर्युदासमवसर्पणेनस
मूहनादीनामंगांतराणां व्यवच्छेदः आघारयतीत्याज्यभागादिहोमव्यवच्छेद इति भेदकमुक्तवान्। एवं
च केवलाहृतसमुच्चयोपि द्वयोरदृष्टार्थकत्वसंभवात्। आघारादीनां प्रकृतावपूर्वकत्वेन भेदाभावा
त्. न वैशानस्य वैकृतस्य प्राकृतसमुच्चयोस्त्वदृष्टार्थत्वादिति वाच्यं. शानस्यापि वर्हिस्तवनेन विधाना
त्. न चैवं क्वापि तथा नस्यादेव नित्ये तन्। न। नैत्वा यामनवनेजयतीति प्रकृतोपि उपितयं दानतेह

दर्भैश्चव निज्पदघारिति श्राद्धविशेषोपदेशेपि समुच्चयश्रवणात् । तदेवमतिपीडनेन विशेषविधिनि
वेशनमनुमित्यतमनेन ॥ ॥ ब्रह्मपुराणे । एतद्वः पितरो वास इत्यनिमल्पनू पृथक् पृथक् । अमुकामुक गो
त्रेतनुभ्यं वास इतीरयन् । ननु समवेतार्थानां मन्त्राणामूहः स्तत्तु अग्न्ये पत्न्यानुष्टभिमतादेः स्पर्पियत्वानुष्ठ
भितिवत् पितर इति बहुवचनं प्रकृतावेवासमवेतार्थं तत्कथमेकोद्दिष्टे तदूहः पाशाधिकरण
विरोधात् । तथाहि दर्शपशावेकपाशिकायां नद्यो प्रकृतौ स्वधितिपाशं प्रमोक्तु स्वधितिः पाशा
न्प्रमोक्तु इति मंत्र द्वये द्विपाशिकायां प्रयुज्यमाने एकवचनान्तस्योहः प्रकृतौ समवेतार्थत्वान्न ब
हुवचनान्तस्यनोहः प्रकृतावेवासमवेतार्थत्वादिति सिद्धान्तादिति चेत् । न । एतदुदूहस्याची साव
लेनपार्वणे परत्वेन तत्रैवासमवेतार्थत्वेन बहुवचनस्य प्रयोगसाधुत्वात् । न त्वेकोद्दिष्टेवी
सायुक्तवानुपपत्त्यनिन संभवात् । यत्र तत्स्वभावादेव प्रकृतावपि स्वभावतार्थत्वं तत्रैको
द्दिष्टेपि तथा । यथा शुंधंतां पितरः शुंधंतां पितामहाः शुंधंतां प्रपितामहा इत्यादौ तत्रैकोद्दि

पिवद्धस्यनां तस्यैव पाठः साधुत्वार्थत्वात्। तदेवमतिपीडनेन दृष्टार्थत्वलाघवमेव शानणमिस्पलम्
नेन॥ ॥याज्ञवल्क्यः। आ वा यन्त्विह तु सा नो विश्वे देवास इत्यृचा। यवान्न्ववकीर्य पभाजने सपवित्र
के। शन्नो देव्या पयः क्षिप्त्वा यवोसीति यवा२स्त्रिपेत्। नचावाहनस्य दृष्टार्थत्वं स्मृतिसंतानहेतुत्वा
दिति कश्चित्। तन्न। तिलविकिरणादिप्रदर्थ व्यवहितस्य स्मृतिसंतानस्य अंदृष्टार्थं तमनवस्था
नात्। अन्यथा वं[illegible]करणे सिद्धान्तविरोधात्। तथा हि सामयागे प्रकृतौ त्रयः पशवो दैक्षाः स
वनीयानुबंध्यश्च दैक्षं प्रकृतिस्तद्विकृतिः स्मरणीयादिः दैक्षं ती[illegible]वत्वं सावदीक्षणीयेष्टि
जन्यसंस्कारविशेषः। तच्च दैक्षपशोः [illegible]शानिनस्य दुं[illegible]कपइस्यास्ति तद्विकृतावथमे [illegible]यवत्वा
भिंशद्यादिनाविभ्य वंधार्थ [illegible] परस्तु [illegible]मतो वेकेन विशेषापदेशात् [illegible] धर्मबाधएवेति
व पं वितमनन्तु। एवं च पशुनयनकालीन बुंक्रिमं त्रस्य पशुपार्श्वस्थितरूप वं[illegible]करणे काल
त्वे दृष्टार्थमुक्तव्यवधानेन दृष्टार्थत्वासंभवात्। अदृष्टार्थत्वेगौरवात्। किं च तत्र विजाती

व्यवधानाभावात्स्मृतिसंतानद्वारा तत्संभवेऽपि प्रकृते तदसंभवात् । तदेवमतिपीडनेन सत्यपि
लाघवे एवशरणमित्यलमनेन ॥ ॥जाबालः॥ आमश्राद्धं प्रदानाग्निः सर्वं चैवमनीषिणः
तेनाग्नौ करणं कुर्यात्पिण्डांस्तेनैव निर्वपेत् । अनग्निः श्रौतस्मार्ताग्निरहित इति केचित् । तन्न । पाक
शब्दाभावपरत्वात् । सर्वशाखिमूलत्वेनोपपन्नो मूलान्तरकल्पनागौरवात् । तथाहि । काम्यता
वत् फलकरणीभूतस्य विषयत्वं फलस्य स्वर्गादेः साध्यत्वं यागस्य साधनत्वेन बोधकत्वं वा
चकाभावात् । करणत्वं च सर्वांगसंपन्नस्य बाधकाभावात् । तेनेतिकर्तव्यताकस्य साधनस्येत
व्यवसायाभावात् । तदसंपन्नावकरणेऽपि तत्संभावात् । सर्वांगसंपत्तिकाल एव तत्संभवात् । तथैवा
र्थाधिकरणसिद्धान्तात् । नित्यनैमित्तिकयोस्तु विषयीभूतस्य करणत्वं । फलसंबन्धाभावात्
विषयभूतं वस्तु उद्देश्यं प्रधानमेवांगानां तदनुपस्थितत्वात् अकरणे निरर्थवादात् । संध्यावंदन
तर्पणस्यावश्यकत्वात् । पश्चादगोऽपि निखिलाभावे शक्यमंगं कुर्वतोऽपि सर्वांगशाकेन संभवे प

यत्किं विदंगबाधयितदाचन ॥ मयनाधाभावादन्यथापायत्रसंगात् । यश्चासांगो यसंहानासाम
र्थ्यंकगतेपिन निवर्तते प्रथमयतीनप्रधानकर्तव्यतावाधात् । तदेवमतिपीडनेनतदावश्यकत्वलप्य
नियतं दृष्टार्थत्वलाघवमेवशनणेमितलमनेन ॥ ॥ मनुः । यथावैवापनः पत्रः पूर्वपत्राद्धिशिष्यते । तथाश्चा
द्वस्यपूर्वोक्तादपनाद्वाविशिष्यते । ननु द्विदयपनाक्कलाभे किं विनिगमकमिति भयत्र श्चाद्वस्याद्विति
वेत् । न । सकृत्कनणेनवशा स्वार्थानिर्वाहात् तत्र प्रथमा दिवस एव कपालाधिकरणे न्यायात् । तथाहि । पुरो
डाशकपालेन तुषानुपवपतीति श्रुतौ कपालेन तुषोपवापने द्युक्ते तत्र समदशकपालमध्ये न व्यवस्थितो
प्रथमोपस्थितकपालात्त्वयोलाघवात् । प्रथमोपस्थितत्वात् । नियामकान्तराभावात् । किं च ऐंद्रं दधि
भवत्यमावास्यायां ऐंद्रं पयो भवत्यमावास्यायां अग्नीषोमीयः पुरोडाशो भवत्यमावास्यायामाग्ने
यः कपालो भवति पौर्णमास्यां अग्नीषोमीयः पुरोडाशो भवति पौर्णमास्यामुपांशुयाजमंतराय
जतीत्युत्पत्तिविधौ तद्धितेनैवेष्ट्वयागे वेष्ट्वएकः कपाल इति श्रुतेः । कपालधर्मप्रसक्तौ विहितत्वेन

अं॰को॰

२०

२७

दर्शादिष्विर्मयाहिरण्यकपालत्वेनावर्म्यादेकस्यैककपालस्याकांज्ञायां प्राग्उपस्थितत्वात् तद्धर्मेणैवाविना
कांज्ञैककपालांतरधर्मो नान्येतिगोनयाद्दितुदाहरणं तत्र आग्नेयवार्थमुख्येवा पूर्वं देशनात्तल्लोकवादिति
निर्वंधानः। तथाहि। आग्नावैष्णवमेकादशकपालं निर्वपेत् सग्रामे सन्नस्वतीयस्याज्यस्य यज्ञे नोविवि
वुभयधर्मग्राधप्याकांज्ञायामग्नावैष्णवधर्मस्यैव ग्राधम्यं प्रथमोपस्थितत्वात् तल्लोकवादिति। यथा लो
केष्पुत्पन्नत्तसान्निध्ये एकः श्राधामिकलांत्रीयथाभिधत्तेऽयमन्ये त्वद्विपनीतं तदा प्रथमाभिधानस्यैवाभि
श्रावकत्वादित्युपलक्षं विस्तरेण। तदेवमतिदीर्घत्वानुमोपदिष्टमितिलावश्यमेव व्याख्यानमित्यलमनेन॥ ॥कामा
यनः। यथाहनि निधाय्यत्रातानि संस्नायाद्दनानुरः। दंतान् प्रक्षाल्यनघाऽऽदो गेहेद्धेनेदमं च वत्। गेहत्वमियं
नाद्धहिनु दृनोदकस्नानमपि समंत्रकमेव स्यादिति चेत्। न घाच भावे विधानात् गेहत्वस्यगवा
मयनेअहत्वेवदविवज्ञातं भवात्। तथाहि। प्रजाकामा गवामयनमुपेयुरिति विधिनाप्तित्तत्र
प्रकृतिभूतेद्वादशाहे ऐंद्रवायवाग्रेषु पत्नीयो दयनीयमाघं नेअहनीति श्रुतं तच्चेतरे धामंगानां
वायवाग्रं प्रथममहः ततः शुक्राग्रतमोभ्रयतायमितेवमहः पूर्णमुक्तं एवं विंशतिदिनादेवापि

२०

द्वादशाहविकृतित्वेन अतिदेशबलादनुष्ठानीयं तथा च प्रकृतावहत्वविवक्षायां दिनक्रमेण विंशत्यादिदिनेष्वि
ष्ठानं भवेत् तत्र च तावतीनां देवतानामसमावेशः । तेन प्रकृतौ नापि दिनक्रमेण विकृतौ स्वस्वभागक्रमेण सिद्ध
मतोऽहत्वमविवक्षितमित्यर्थः ॥ तदेवमतिपीडनेन श्रुतपदार्था विवक्षायां बाधसत्वमेवशासनेणमित्यलमनेन ॥ ॥ व्र
स्मपुनाणे । स्निग्धवर्णेन नक्तेन न त्रिविपस्य प्रशस्यते । कांचनाभेन वैश्यस्य कृष्णेनाप्यंत्यजन्मनः ॥ तत्र विशेषोपदेशबला
दधिकानसिद्धो तदनुकूलविधाकल्पनं निषादस्य पतिं याजयेत् वर्षासु रथकार आदधीतेति वत् शङ्कानुनो येना
र्थकल्पनात् तस्योपजीव्यत्वात् यत्तु तण्डुलपदवदविवक्षितार्थमित्यविधपनमेतदिति । तत्र । विनोद्यात्
तथा हि यस्य निरुप्तं हविश्चन्द्रमा अभ्युदियात् स त्रेधा तण्डुलान् विभजेदित्यादौ देवतातो हविर्विभजेदिति सामान्ययह
णात् युक्तातण्डुलपदस्य हविस्सामान्यपरता साकांक्षत्वाविशेषात् इह तु न तथा किंचिदस्तीति कथमविवक्षा
स्य अन्यथा निषादस्थपतिरथकारपदानामप्यविधमात्रपरत्वापातात् ननु निषादस्थपतिपदे षष्ठीसमा
सादने रथकारपदेच योगार्थादने जातिविशेषवतोऽनपितत्वेन स्यादिति चेत् । न । रूढ्यर्थस्य शीघ्रत्वादिति
नात्किंचिदेतत् । तदेवमपदार्थकल्पने गौरवं रूढ्यर्थोपस्थितिलाघवं चयथायथं शासनेणमित्यलमनेन ॥ ॥

ब्रह्मपुराणे। युवानस्तु गृहे यस्य मृता स्त्री पिण्डं प्रदापयेत्। शङ्खेन वा हन्तायै वै ते पिण्डं दद्याद्धतुर्दशीं। नन्वेवं स्त्रीणां पुंम
मरणानि भिन्नकं श्राद्धं न स्यादिति चेत्। न। पुंस्त्वस्याविवक्षितत्वात् स्वसंबंधिपरत्वात्। हविरुभयत्ववत्। तथा
हि। यस्योभयं हविरार्त्तिमृच्छेत् स पञ्चशरावमोदनं निःक्षिपेत् अग्नये देवताभ्यो हविर्विभजेदिति सामान्याभिधाना
दुभयत्वमविवक्षितमित्युक्तसमानमेवैतत्। अन्यथा हविस्त्वोभयत्वयोः स्यात्सर्वकल्पने गौरवात्। वाधकसो
क्तत्वात्तदेवमतिपीडनेन वाधकमर्थमेवाविवक्षाशरणं लाघवं चेत्फलमनेन॥ ॥भविष्यपुराणे। ष
ष्ठीसमेता कर्तव्या सप्तमी नाष्टमीयुता। पतंगोपासनायेह षष्ठ्यामाहुरुपोषणं। नन्वेकस्मिन्नेव दिने तत्पूर्ण
तिथिलाभे व्रतलोपः स्यात् षष्ठीसमेतसप्तम्यलाभादिति चेत्। न। अपेक्षितविधित्वात्। तथाहि। यद्येक
स्मिन्नेव दिने तल्लाभस्तदा कांक्षैव नास्ति वैषम्याभावात्। यदा तूभयस्मिन्नादिने तल्लाभस्तदा तूभयत्रादिने
तत्करणप्रसक्तौ तद्वतानःसकृत्करणे नैकद्वार्थस्यार्थनिर्वाहात्। तदेवमतिपीडनेनाकांक्षासमानाविष
यत्वलाघवमेवशरणमित्फलमनेन॥ ॥मत्स्यपुराणे। संपूज्य द्विजदांपत्यं नानाभरणभूषितं। वृषोत्स

र्मेवकुर्वीतदेयाचकपिलाधुस्या। ननुफलाश्रवणाद्दोषोत्सर्गादीनांनित्यत्वमितिचेत्। न। विश्वजिन्न्यायेनस्वर्गफ
लकत्वकल्पनात्। तथाहि॰ कालवीप्सानिंदार्थवादादिकमंतरेण विधेरिष्टसाधनत्वावगतौ तद्विष्टविशेषाकां
क्षायांग्रामपश्वादीनांगौणत्वात् स्वतःफलं स्वर्गमोक्षावुपस्थितौ तत्रमोक्षस्याभावरूपत्वेनगुरुत्वात् स्वर्गएवफलं
कल्प्यतेलाघवात्। यद्वानिंदार्थवादत्तदानफलकल्पनं प्रवृत्तेरन्यथोपपन्नत्वात्॰ ननुकार्यताविधिपक्षे
कथमेतत् तदकरणेपापश्रवणान्न च कर्तुस्तस्यापिसंभवेन विनिगमकाभावादितिचेत्। न। तस्यानुपस्थितत्वा
त्॰ यागविशेषस्यचोपस्थितत्वेन तत्रफलकल्पनौचित्यात्। यन्नुफलकल्पनेगौनत्वं कार्यताज्ञानस्यैवप्रवर्त
कत्वात् एवं चकाम्यप्रकरणेतदभिधानमेवतदवतानवीजं प्रकरणस्यबलवत्वादितिः। तन्न। पापानुत्पादकल्प
नापेक्षयाफलकल्पनस्यैवलघुत्वात्। तदेवमातिपीडनेलाघवमेवशरणमित्यलमनेन॥ ॥शातातपः॥ अर्वा
क्संवत्सराद्यस्यपूर्णेसंवत्सरेतथा। येसपिंडीकृताः प्रेतानतेषांतुपृथक्क्रिया। ननुसंवत्सरांतेहृद्धौसपिं
डनेसंवत्सरांतनविधिनितिचेत्। न। संवत्सरांतनेपि पिंडानुवादेनतद्विधेनपिकल्पनात् तेनविनानुवा

अ० कौ०

२९

दासंभवात्. वतुनहं पंचाहं जुहोतीतिवत्. तत्रवकृर्दो पंचधावा पुनोऽशखंडनानुवादेन तन्मूलविधिकल्प
नात्तेनविनातदभावादितिनकिंचिदेतत्॥ ॥सपिंडनमित्यनुवृत्तौगोभिलः। पूर्णेसंवत्सरेत्रिपक्षेवाग्मासे
यदहर्वावृद्धिनापद्यतेनवममासेपीतिकश्चित्। नचैवंमासिककालबाधादनावनएणमेवनेषामितिवेत्। न।
सपिंडनापकर्षेशेषमासिकानामप्यपकर्षात्। तिष्ठंतपशुंप्रजपतीतिवत्। अन्नन्त्राथापकर्षेहविनासादनप
शुकर्मापकर्षात्। तथाहि. एकादशाहश्राद्धस्याद्यत्वेसपिंडनस्यांत्यत्वेशब्दादेवसिद्धेअर्थान्मासिकानांमध्यत्व
सिद्धौतदंत्यापकर्षेणतद्यानांमासिकानामप्यपकर्षः। अन्यथातेषांमध्यत्वासंभवात्. किंचषोडशश्राद्धप्रयोग
विध्यैक्यबलादपिक्रमकल्पनसंभवात्। एवंकृवित्रदाद्यापकर्षेणापितदंतापकर्षस्तुल्ययुक्तिकत्वात्. ए
वमुत्कर्षेपियथा. अग्निमारुतादूर्ध्वमनुयाजैश्चरंतीत्यादौऽनुयाजस्यप्रथमोत्पत्तिकस्योत्कर्षान्तरसूक्तवा
कादीनांमध्योत्पन्निकानामुत्कर्षस्तुल्ययुक्तिकत्वात्। वस्तुनः। पंतरेधिमासपातेमासिकवृद्धौसपिंडनवृद्धि

२९

वत्। तदेवमतिपीडनेन प्रयोगविध्येकफलाद्धवमेवशरणमिति फलमनेन॥ ॥उशना। श्वः कर्तास्मीति निश्चित्य तावि
प्रान्निमंत्रयेत्। निनामिषं सकृद्भुक्त्वा सर्वं भुक्तं जनेगृहे। ननु निमंत्रणाभावे निनामिषसकृद्भोजनमपि नास्ति क्षाव
लेन तयोरंगांगिभावावगमादिति कश्चित्। तन्न। त्रिवृतामूपं पनिवीयाग्रेयं सवनीयं पशुमुपाकरोतीत्यत्र यूपपत्निव्या
नस्य पशूपाकरणांगतापत्तेः। तद्द्वयमधिकृताधिकारत्वादेकांगमिति चेत्। न। अधिकृताधिकारित्वेन निनामि
षसकृद्भोजनयोर्नपि समानत्वात्। कथानंतर्यशक्त्वेनांगताबोधने सामर्थ्याभावात्। फलवत्सन्निधावफ
लत्वस्य तत्र तंत्रत्वात् समानकर्तृकत्वस्य प्रयोगेप्यनेन संभवात्। एवं न जातु येकश्चिदभिषेवनीयात्वः सोमया
गोस्तितत्सान्निधिपाठस्यांगे दीक्षितिनाजन्यं जिनागिरौनः शेफमात्थापयतीत्यत्र देवनादीनां राजसूयांगत्वं
राजसूयस्य प्रस्तुतत्वात्। तत्कथं भावाकांक्षायामेव तद्वतानात्। उक्तं च भट्टेन। अविद्धिर्त्वेकथं भावेप्रधा
नस्येह पद्यते। अविज्ञातफलं कर्म तस्य प्रकरणांगता। तदेवमतिपीडनेन लाघवमेव शरणमिति फलमनेन॥
॥ ॥कात्यायनः। श्वः पितृभ्यः पितादद्यात्तु न तत्कारकर्मणि। पिंडानां दहनान्ते चांतस्याभावेतु तत्क्रमात्। ननु

अ०कौ०

३०

पिंडानित्यभिधानात्पिंडदानमेवमुख्यं श्राद्धमिति चेत्। न। तद्धीनेपि मित्यथ श्राद्धादौ तत्पदप्रयोगात्। पिंडानित्यनेनां
गमुखेन प्रधाना निर्देशात्। फलचमसेनेव ज्योतिष्टोमस्य तथैव सिद्धांतात्। तथा हि। ज्योतिष्टोमे सोमद्रव्यकत्वासि
तो राजन्यकर्तृके तस्मिन् फलचमसमभक्षं दद्यातीति मन्त्रेण स्यागस्य चमसनिष्पाद्यत्वे यागेपि वटद्रव्यो द्रव्य
रूपचमसविधिर्न प्राप्तः चमसरूपमन्त्रदाने विधिमुखेन ज्योतिष्टोमे प्रधाने तद्द्रव्यकत्वलाभात्। किं च सोमं पि
बतीति शेषयागरूपसोमनामकता सिद्धपानमुखेन ज्योतिष्टोमे विधीयते। यद्यपि तादिनामहो वा न सोमं पिबति
भवति सत्रात्प्रवृत्तिनिंदार्थवादस्यापि तत्परत्वात्। अन्यथा पानस्यादृष्टार्थतापातात्। तदेवमनिपीडनेन द्रव्यां
तरादृष्टार्थत्वादिकल्पनागौरवाद् पानेनापूर्वमेव दानएमित्यलमनेन॥ ॥याज्ञवल्क्यः। सव्याहृतिंकां गा
यत्रीं मधुवाता इति त्र्यचं। जप्त्वा यथासुखं वाच्यं भुंजीरंस्तेपि वाग्यताः। कात्यायनकल्पे अयं जपो नास्त्येवानभिधाना
दिति कश्चित्। तन्न। सर्वशाखाप्रत्ययमेकं कर्मेति सिद्धांतात्। नानास्थानोक्तविध्यनुवादादिना समुच्चितस्य
श्राद्धस्य कर्मण एकत्वावगमात् तस्य च नानाशाखापूरणीयेतिकर्तव्यताकत्वात्। अन्यथा वाक्यभेदसूचना

३०

३०

दिकल्पनाप्रसंगात्· शब्दांतराभ्यासंख्यागुणप्रक्रियानामधेयानामेव कर्मभेदकत्वात्। शब्दांतरं यथा। जु
होति यजति· तेषां लोकेर्थभेदावगमात्। शब्दांतरस्यैव तद्भेदकत्वं· तदुक्तं संज्ञानदीप्यवच्छेदो य जिं पूर्वेण चाव
ति। न च पूर्वं तमिसे वंबलादर्थांतरंगत इति॥ अभ्यासो यथा· इडो यजति समिधो यजति। तत्र लोकेर्थभेदानवग
मादेकस्यापि नामकत्वसंभवेनाभ्यासस्यैव तत्त्वात्। संख्या यथा· सप्तदश प्राजापत्यान् पशूनालभेत· इत्य
त्र बहुत्वावच्छिन्ने पशुयाग एकादशावदानमुक्तं अतस्तद्विकृतावपि तत्त्वं प्राप्तं· तच्चैकपशुत्वे वा नो बहूनां पशू
नां नैकयागान्वय इ। अवदानाधिक्यप्रसंगात्। पशुसंख्याभेदस्यैव भेदकत्वं· गुणो यथा· तप्ते पयसि दध्यानय
ति इत्यादौ तत्र वाजिभ्यो वाजिनमिति द्रव्यरूपगुणभेदस्य तत्त्वाद्विश्वेदेवयागे तदाकांक्षाभावात्· गुणानां स
मुच्चयविकल्पादिसंभवे वीजाभावात्। प्रकरणं यथा· मासमग्निहोत्रं जुहोति· अत्राग्निहोत्रपदद्वयोगापि प्रक
रणभेदाद्यन्ययागपरत्वात्· नामभेदो यथा· ऐषज्योतिर्विश्वज्योतिः सर्वज्योतिरिति। तत्र नामभेदस्यैव
तथात्वमिति· कश्चित्तु आकांक्षामूलकोयं नयो नु क्रमन्यतो यायिमित्येकवाक्यतावलात्। यदा प्राणं

अ०कौ१०

३१

३१

शात्वोयांपानक्रममविनोधियत्। विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवदितिसमानमूलकमेतदित्याह·
तदेवमतिपीडनेनामेदादिकल्पनालाघवमेवशरणमित्यलमनेन॥ ॥मनुः। सपिंडतानुसर्वेषांगोत्र
तः सप्तपौरुषी। पिंडश्चोदकदानं चशौचाशौचं तदानुगं। समानएकः पिंडः शानीनं संबंधीयेषां ते सपिंडाः४। न
नुयोगेयमतिप्रसक्तोष्टमादेन पितृत्वादितिचेत्। न। गवामयनवदुपाधिसंभवात्। तथाहि· द्वादशाहेनय
जेतेत्यत्रप्रायणीयोदयनीयावाधंतेऽग्नहनीगवामयनेचेतिश्रुतं तत्रप्रयोक्त हान्यनेनेतिप्रायणीयं तुद्यन्ह
न्यनेनेत्युदयनं तत्रछत्रत्ययेन प्रायणीयोदयनीयपदेसिद्धे एवंचपंचाहादिद्यहत्र्यहेष्वपिउपक्रमोपसंहा
रादिने प्रायणीयोदयनीयेप्रसक्तेतेनद्वादशाहिकगवामयनिकाधंताहान्यतनत्वमुपाधिनतोनान्यत्रा
धंताहेऽतिप्रसंगः४। तथात्रापिवीजिनमानभ्यसप्तान्यतमत्वमुपाधिः। सएवशक्योनाष्टमादिनन्यथानिया
मकांतमानुसरणगौरवात्। यत्तुपिंडोनिर्वाप्यस्तत्संबंधोदातृत्वेनोद्देश्यत्वेनवातद्वत्सप्तानामेवेति। तत्र।
यत्रपितापितामहोवाजीवतितत्राष्टमादेनपितृसंबंधित्वात्। तद्देवमतिपीडनेनानन्यगतिकत्वसंवलितंल

३१

ध्रुवमेवशरणमित्यलमनेन॥ ॥भविष्यपुराणे। श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी। यत्रास्य नाविरोधे तु न्यायायु
क्तं प्रमाणवत्। यथोदुंबरीं स्पृष्ट्वोद्गायेदिति श्रुतिः सर्वा औदुंबरी वेष्टयितव्येति स्मृतिस्तनयोर्विरोधे स्मृतेरन्यथा
त्वं बहुभागवेष्टनपरत्वात्। श्रुतेरुपजीव्यत्वेन बाधायोगात् अन्यथा स्वोपजीव्यबाधे स्वबाधस्यापि प्रसंगात्· तथाचा
तिगौरवात्· यद्यपि स्मृतिरपि वेदमूलिकैवेति विनिगमकाभावस्तथापि श्रुतिः साक्षादनुमेया न प्रत्यज्ञा न च प्रत्य
क्षश्रुतिविरोधेन संभवति तदनुमानं बाधात्। श्रुत्यनुमानस्य विलंबितत्वेन प्रत्यक्षश्रुतेः प्रागेवार्थविधानेन संभवात्·
नापि षोडशिग्रहणाग्रहणवद्विरोधे श्रुत्यनुमानं· बाधसापेक्षे विधिकल्पनागौरवात्· एवमाचारस्मृत्योर्विरो
धे स्मृतेर्बलवत्वं· साक्षात् श्रुत्यनुमापकत्वात्· आचारस्य स्मृतिमनुमाय तदनुमानसंभवात्· उच्छिन्नवेदाध्ययन
कल्पनायोगात्। तदुक्तं भट्टेन· तेनाचारः स्मृतिं यावद्वेदमानुं समुत्सुकः। श्रुतिमूलास्मृतिस्तावद्धर्ममेवावधारये
दिति। तदेवं मतिपीडनेन तु ध्रुवमेवोपजीव्यबाधासंवलितं शरणमित्यलमनेन॥ ॥प्रयागे वपनं कुर्याद्गयायां
पिंडपातनं। दानं दद्यात्कुरुक्षेत्रे वाराणस्यां तनुं त्यजेत्। नवत्वविधौ फलाश्रवणाद्विश्वजिद्वत्फलकल्पनमिति

अ०कौ०

३२

चेत् । न । किं गयापिंडदानेन कारणं वामनत्वेन किं । किं कुरुक्षेत्रदानेन प्रयागे मुंडनेऽपि इति श्रवणात् नात्रिसत्रवदर्था
र्थवादिकफलाश्रयात् । तथा हि - य एतानात्रीर्यजन्ते तस्यापितरो घृतकुल्यां मधुकुल्यां ज्ञरंति एवं प्रतितिष्ठंति य एता
रात्रीरुपयंतीत्याद्यर्थवादोपस्थितस्यैव पितृतृप्त्यादेः फलस्य सत्रमुपासीतेति विधावन्वयः स्यात् साकांक्षत्वात्
विधिवाक्ये फलाश्रवणात् । फलांतरकल्पने गौरवात् । अर्थवादिकफलाभावे विश्वजिदन्यायादेतदेवमत्तिपीड्यने
न लाघवमेव शरणमित्यलमनेन ॥ ॥ लघुग्रन्थीतः ॥ जपे होमे तथा दाने स्वाध्याये पितृतर्पणे । अशून्यं तु करं
कुर्यात् सुवर्णरजतैः कुशैः ॥ ननु बहुत्वस्य त्रित्वतुल्यादिविशेषे तत्वादनध्यवसाय इति चेत् । न । कपिंजलाधिकरण
न्यायेन त्रित्वपरत्वात् । तथा हि । कपिंजलानालभेतेति श्रुतौ बहुवचनार्थानध्यवसाये प्रथमोपस्थितत्रित्वमेव
तदर्थोऽवगम्यते लाघवात् । अन्यथा विनिगमकाभावादननुष्ठानप्रसंगात् । एवमिहापि कुशैरिति प्रथमोपस्थितत्रि
त्वपरं तुल्ययुक्तिकत्वात् । तज्ज्ञानाध्यवसितपरं । यत्र त्वनध्यवसानं नास्ति तत्र दशत्वादिपरत्वे बाधकाभावात् ।
अनध्यवसायस्यैव तन्न्यायावतारबीजत्वात् । अत एव ऋत्विग्योपनमर्दं वेत्यादौ तु लाघवमुपेक्ष्य षोडशर्त्विजां

३२

प्रकरणविशेषादेव विनियामकत्वात्. केचित्तु अध्यवसितगोचरत्वेपि सांगत्वबोधकमंत्रेणैव तद्वत्तानः। गुरु
याद्यनुगमेत्रैनिनिवत्. तत्र चतुष्पदशादिपरत्वेवाधकाभावादित्याहुः। ननुवरुणचनस्य नवित्वपरत्वं सामान्यप
रत्वेवाधकाभावात्। नचाननुगमः वरुत्वेन सामान्येन सकलपरत्वात्। नचानध्यवसानं फलभूमानुसरणादि
तिचेत्। न। निषेधप्रयोगेषु च तदभावात्। एवंकाम्येप्येकत्वनिर्णीतइतिन्यायात्। तदेवमातिपीडनेनलाघवमेवशरण
मित्यलमनेन॥ ॥ब्रह्मपुराणे. ब्रह्मरुद्रेंद्रचंद्रार्कवसवोमंडलांतनात्। निवेदितं ननैनत्रयस्मात्कूर्तिना
प्यथा॥ एवंवैषांभोजनकाले बलिदाने। ननु मंडलानुवादकमेवैतदितिचेत्। वाधकाभावात्। नचैवं वाक्यभेद
इतिवाच्यं. सूक्तवाकादिवत्कल्प्यत्वात्. तथाहि. सूक्तवाकेन प्रस्तरं प्रहरतीतिदर्शपौर्णमासयोः श्रुतं तत्र इंद्राग्नी
वाचिः पिपीतामित्यादिदर्शपूर्णमासदेवताप्रकाशकसूक्तवाकस्य विच्छिद्य दर्शपूर्णमासयोर्विनियोगः कल्प्यते. ननु
मिलितस्यैवतत्र लिंगविरोधात्। दर्शदेवताबोधकस्य पूर्णमासे विनियोगायोगात्। दृष्टार्थत्वे संभवत्यदृ
ष्टार्थत्वायोगात्. लिंगस्योपजीव्यत्वाच्च. नचैवमाहितः पूतश्चाहवनीयो भवतीत्यादावपिविशिष्टेत्र वचपीनस्यात्

वाक्यभेदस्येष्टत्वात्· एवं संभवत्येकवाक्यत्वे वाक्यभेदो न कल्प्यत इत्यादि तन्मूलकस्मृतिविरोधः स्यादिति चेत् । न ।
बाधकाभावे तथात्वात्· लाघवमूलत्वात्· प्रामाणिके भेदे तदनवतानात्· उपवासात्परं भैक्षं भैक्षात्परमयाचितं· अ
याचितात्परं नक्तं तस्मान्नक्तेन वर्तयेत् । इत्यादौ उपवासनक्तादिनानाविधौ वाक्यभेदस्य श्रीदत्तादिना स्वीकाना
त् । नच नक्तानुवाद उपवासस्तावको वैयर्थ्यापातात्· पुंवाक्ये वैयर्थ्यस्यापि जघन्यत्वात्· तदनुरोधेन वाक्यभे
दस्यापि स्वीकानात्· तदेवमनिपीडनेनोपजीव्यत्वसंवलितं लाघवमेव शरणमित्यलमनेन ॥ ॥ सुमंतुः ॥
बालणे [illegible] विशां [illegible] गर्भाधानपुंसवनसीमंतोन्नयनजातकर्मनामकरणनिष्क्रमणान्नप्राशनचौडोप
नयनव्रतचर्याध्ययनसमावर्तनविवाहसोष्यंतीयइंदानानि । वृत्तिः किया· सोष्यंतीसु खप्रसवार्थं कर्म· न
तु साहचर्यात् व्रतचर्याध्ययनवनादीनामपि संस्कारत्वमिति चेत् । न । तन्मध्यपाठस्यावरूपकर्तव्यतापन
त्वात्· संस्कारत्वस्य कर्मण्यानंभवाव्यत्वादित्त्वनिनस्तत्वात्· कर्मण्यः कर्मयोग्यः संस्काराधानहेतुरितिया
वत् । तादृशो यज्ञारंभस्त्वास्मिन्नकृते तेनैव भाव्यत्वात् पुनस्तदानंभासंभवात्· संस्कारवति संस्कारानुत्पादात् ।

लोके दर्पणादेस्तथा दर्शनात्· अपूर्ववत्पूर्वोत्पत्तौ चाविनियोगात्। कार्ये च संस्कारत्वरूपविशेषकल्पनागौरवात्
कार्यत्वेनैवावगमात्। यद्वा कर्मणियागादौ समाप्तेपि पुनर्नारंभेपि भाव्यत्वं बाधकाभावात् व्रतचर्यादीनां संस्का
रकत्वे तदसंभवात् सकृदारंभेनैव संस्कारसंभवात् उपनयनादिवत् लाघवात् आहृतौ मानाभावात्· तदेवमतिपौ
नेन लाघवमेव शरणमित्यलमनेन॥ ॥भविष्यपुराणे। हविष्यभोजनं स्नानं सत्यमाहारलाघवं। अग्निकार्य
मधःशय्यां नक्तभोजी षडाचरेत्। ननु क्षमा सत्यं दया दानं शौचमिंद्रियनिग्रहः। देवपूजाग्निहवनं संतोषस्तेय
वर्जनं। सर्वव्रतेष्वयं धर्मः सामान्यो दशधा स्मृतः। इत्युक्तधर्मोपदेशेन सिद्धमन्यथा वाक्यभेदापातात्। इति कश्चि
त्। तन्न। पदाहवनीयवद्बाधात्। तथाहि पंचाग्नयो भवंति तत्र सभ्यावसथ्यवाह्निकाग्नी स्मार्तौ श्रौतास्त्रयः। अथ
नेगार्हपत्यं गार्हपत्याधानसंबंधित्वात्· ततश्चोद्धृतदक्षिणाग्न्याहवनीयो तत्राहवनीये जुहोतीति सामान्यतः आह
वनीयस्य होमांगत्वमुक्तं तथाश्वमेधे पदे जुहोतीति विशेषविधिना प्रकरणाविशेषादिसव्यपेक्षेणाश्वसंबं
धिपदस्याधानत्वं बोध्यते· अन्यथा विधिवैफल्यात्· न चात्र विकल्पो व्यवस्थासंभवात् ऐच्छिकविकल्पे गौरव

अ०को०

३८

स्यदोषत्वात्· अवस्थितस्याधिविषयभेदेनैवसंभवात्। तदेवमतिपीडनेन विशेषविधिसंवलितंलाघवमेवशरण मित्यलमनेन॥ ॥मनुः। मौंजी त्रिवृत्समाश्लक्ष्णाकार्याविप्रस्यमेखला। क्षत्रियस्यतुमौर्वीज्यावैश्यस्यशणसंभवा॥ मौर्वीमुरुमवा· ज्या· धनुर्गुण॥ ननुमौर्वीपदादेवतल्लाभेज्यापदवैयर्थ्यमितिचेत्। न। तत्रस्थस्यैवमेखलाविनियोगलाभार्थंतदुपादानात्। खलेवालीयूपोभवतीतिवत्। तथाहि· खलेवाली खलनिखातकाष्ठविशेषाभिधेयेतियावत्· श्रुतिस्तस्ययूपसाधनत्वंविधत्ते· तत्रद्विविधोयूपसंस्कारः स्वरूपनिष्पादकोदृष्टार्थश्चतत्रस्वरूपनिष्पादकस्तक्षणादिरूपः संस्कारोव्यवच्छिद्यते खलेवालीतिविशेषोपादानात्तयादृशस्यखलेवस्थानेतादृशस्यैवयूपत्वावगमात्· अन्यथातदुपादानवैयर्थ्यात्· नचखलावस्थितकाष्ठस्यैवतादृशादृष्टहेतुत्वमितितदर्थंतदुपादानमितिवाच्यं। दृष्टेनैवोपपन्नावदृष्टकल्पनायोगेनचात्· अन्तरत्वाच्छिविधोपिसंस्कारोनतथाविधतदवस्थितस्यैवोपादान· विशेषाभिधानादित्यभिधानात्। तदेवमतिपीडनेन विधिसंवलितंलाघवमेवशरणमित्यलमनेन॥ ॥देवलः। उच्छिष्टेनाविण्मूत्रंसंस्पृष्टोन्नप्रपचाचम्यप्रयतोभवतिद्विः· प्रज्ञाल्यतंदेशं। नन्वानंतर्यवारिस्को

३८

विशेष २

तयं

स्वनसादावमनानंज्ञालनंत्रा धंद्भतिचेत्। न। आर्थक्रमेण शाब्दक्रमबाधात्। अग्निहोत्रं जुहोति यवागूं पचतीतिवत्। तथा
हि। जुहोतीत्यत्र होमद्रव्याकांक्षायां यवागूपाकविधेनैव तदाकांक्षापूरणे क्रमत्वं सन्निधानाभावात्। विध्येतनाभावात्। अन्यथा
नित्यहोमद्रव्यांतरं यवागूपाकस्यादृष्टार्थत्वमित्युभयकल्पने गौरवात्। एवं शाब्दक्रममुपेक्ष्य यवागूं पचति अग्निहोत्रं जु
होतीत्यार्थक्रमादरः। आकांक्षानुरोधात्। इदं चोपलक्षणमन्यथा पि शाब्दक्रमोन्नयनं। शिष्टाकोपस्वरसात्। शिष्टमनु
शिष्टं तदकोपस्तदविरोध इत्यर्थः। तदुक्तं। शिष्टाकोपसंस्त्वके धिकरणे। वेदं कृत्वा वेदिं कुर्वीत। वेदः कुशमुष्टिः। वेदिः
परिसमूहनं। अव्यक्त्वावलेन क्रमलाभे पि मध्ये निमित्तोपनिपाते नैमित्तिकमावमनं तथा यत्क्रमतो वेदमूल
कत्वेनैकवाक्यतावश्यकत्वात्। शास्त्रस्य क्रमतात्पर्याभावात्। युक्तं चैतत्। नैमित्तिकानि कर्माणि निपतंतियदा
यदेतिस्वरसात्। वाक्यस्यार्थं तिनादिपनत्वे गौनत्वात्। तदेवमतिपीडनेनलाघवमेव शरणमित्यलमनेन॥ ॥
विष्णुः। कार्तिकं सकलं मासं प्रातः स्नायी जितेंद्रियः। जपन् हविष्यभुक् शांतः सर्वपापैः प्रमुच्यते। स्वस्वानंगधानंत
पादिकमेणेति कश्चित्। तन्न। विनिगमकाभावेन सर्वेषामेव प्रधानत्वात्। अनुणोन्यायात्। तथाहि। अनुणयै
कहायन्या पिंगाक्ष्यागवासोमंक्रीणाति। तत्रानुणयादीनां न पनस्यन्मवद्यो गुणानां स्वप्रनार्थत्वाद संबंधः समत्वात्स्यादिति

अ अ०को०

३५

३५

न्यायात्. तदर्थः गुणानां विशेषणानां परार्थत्वात् विशेष्यसाकाङ्क्षत्वात् परस्परमनन्वयः सर्वेषां समत्वेन
विनिगमकाभावात्. एवं सर्वेषामेवारुणादीनां प्राधान्येन क्रयसाधनत्वं. अन्यथा विभक्तिभेदवैफल्यात्. किं
च गवा क्रीणातीति गोत्वविशिष्टस्य धर्मिणः साधनत्वेन विहितत्वात् अरुणादिपदस्याप्यारुण्यादिविशिष्टधर्मि
परत्वे प्राप्तस्य धर्मिणः प्राप्तस्यारुण्यादेश्च क्रयसाधनत्वविधौ विध्यनुवादवैरूप्यापातात्. गौरवाच्च. एवं च
न विशिष्टबोधः. पश्चादेकवाक्यताविरहात्. किंतु खलेकपोतन्यायात्. यथा खले कपोता युगपदेवोड्डीना निप
तन्ति न त्वेकतया विच्छेदः तथा सर्वपदार्थानां युगपदेव क्रियान्वयात्. ननु यद्येकवाक्यतं योग्यं सन्निधानं प्रपद्य
ते तेन तेनान्वितः स्वार्थः पदैर्बोध्यते इत्युक्तरूपराजमार्गप्रवेशन्यायेनोक्तादोषः. नन्वेवं वाक्यभे
दः स्यादिति चेत्। न। अनुपपत्तिवत्त्वेनेष्टत्वात्. न च शब्दसाधुत्वार्थं विभक्तिरर्थसाधुत्वे बाधकाभावात्. अ
न्यथा गौरवात्. एवं पादावपि. गौणमुख्यभावे विनिगमकाभावात्. गामेकादशगुर्दद्यादित्यादौ अरुणगोदानेऽन्ता
गुत्वस्याकिंचित्करत्वात्क्षितिकारश्चेत्। तदेवमतिपीडनेन लाघवमेव शरणमित्यलमनेन॥ ॥छंदोगपरि

डे२

शिष्टे। अभ्युद्धृत्य यथाशक्ति किंचिदन्नं यथाविधि। पितृभ्यश्च मनुष्येभ्यो दद्यादहरहर्द्विजः। ननु पितृत्वस्य
पनपितृसाधारण्येनातिप्रसंगात् स्वपितृत्वमेव वाच्यं। स्वपितृभ्य इत्याद्येकवाक्यताबलात् इति चेत्। न। पद
पांशुना रूपमनक्ति सप्तमं पदं गृह्णातीतिवदन्यथा तल्लाभसंभवात्। तथाहि। पदपांशुनाञ्जनविधाना
दृष्टे कस्य पदैरिति पदमित्याकांक्षायां सोमक्रयण्यार्थोपस्थितेनानाइत्ये घनुण्या या एव पदिन्याः पदमित्य
वगम्यते प्रकरणात्। अत्रापि तर्पणजनकपुत्रत्वं पितृत्वं तच्च जन्यसापेक्षमित्यवश्यं तदुपस्थितता वाकांक्षा
दिवत्वे नाचितामित्याने पञ्चमानधि तल्लाभसंभवात्। नद्यान्त्वप्रकारसंबंधाद्युपस्थितिर्विभक्ति तएवेति
ननु घटत्वेनैकेन तथाज्ञानमिति वाच्यं। विशिष्टस्यैवाभ्यादानात्। पिधेहीत्यादौ द्वारादिवत्तथैवार्थाध्याहा
रादिनयसिद्धान्तात्। अन्यथा पदपांशुनेत्यादाववधिगत्यभावात्। न च तत्र मानसी तथा बुद्धिर्न त्वपितृत्वस्य त्वात्।
ननु पदत्वादिनापि रूपेण विशेषबुद्धिसंभवो घटत्वेन नीलघटत्ववत् सामान्यपदस्य विशेषपरत्वसंभवात्।
एवं पित्रादिपदे पीति चेत्। न। स्वपितृत्वबुद्धेरसंभवात्। एवं पदपांशुपदे पितृत्वादिति। तदेवमतिपिडने न बुद्धि

अ०कौ०

३६

36

स्यत्वेनोपस्थितिलाघवमेवशरणमिति अलमनेन॥ ॥देवीपुराणे॥ शिवे विवर्जयेत् कुंदं उन्मत्तं च तथा हरे
नैव। देवीनामर्कमंदारौ सूर्यस्य तगरं तथा। ननु दुर्गापूजने मंदारादीनां विहितत्वात् विधिनिषेधविरोध इति
चेत् न। विशेषविधाने सामान्यनिषेधस्य तदितरपरत्वात् सामान्यविशेषन्यायात्॰ विधिनिषेधयोर्विनि
कवाक्यत्वासंभवात्। एकविरोधाभावे सामान्यपदस्य विशेषपरत्वमेकवाक्यताबलात्। न च वैपरीत्यं॰ सामा
न्यपरत्वे लक्षणापातात्॰ समानप्रकरणे तदुभयाभिधाने गोवृषन्यायावतारात् तस्य पौनरुक्त्यमूलकत्वात्॰
तथा हि। गामानय बलीवर्दं चेत्यत्र गोपदादेव बलीवर्दलाभे बलीवर्दपदं पुनरुक्तमित्यनर्थकत्वप्रसंगेन
गोपदस्य स्त्रीगोपरत्वं सामान्यविशेषभावे तु न तथा॰ तस्य विरोधमूलकत्वात्॰ एवं सामान्यविशेषविधिनि
षेधे तुल्यमेतत्। इदं त्ववधेयं॰ यत्र विशेषस्य सामान्यव्याप्यत्वं तत्रैव विशेषविधिनिषेधबलेन सामा
न्यस्य तदितरपरत्वं निरवकाशत्वात् सावकाशत्वे संकोचासंभवात्। तदेवमतिपीडने नाविरोधक
ल्पनालाघवमेव शरणमित्यलमनेन॥ ॥याज्ञवल्क्यः॥ ग्रावा धूर्वं बनं त्रेरात्तीर्य नकुशान्

३६

प्रचीन्। प्रागग्रेषु सुरान्सम्यग्दक्षिणाग्रेषु वैपितॄन् नन्वावाहनस्य स्मृतिसंतानद्वारा दृष्टार्थमि
ति कश्चित् तन्न स्मृतेस्तात्पर्यांतमनवस्थानात् अदृष्टार्थत्वावश्यकत्वात् नन्वस्त्वदृष्टार्थकत्वं दृष्टा
र्थकत्वं स्याद्दाश्रयिन्यायादिति चेन्न तथाहि यस्यैकस्यैवोभयरूपत्वं दृष्टार्थत्वमदृष्टार्थत्वं वान
च्छेदभेदेन तदाश्रयित्वं पारिभाषिकं स्विष्टकृद्धोमस्वाहाकारहोमवत् अत्र दृष्टफलसंबंधे अदृ
ष्टं न कल्प्यते विलंबितत्वात् व्रीहीनवहंतीतिवत् तदभावे चादृष्टार्थत्वं एवं च स्वाहाकारयागा
दौ त्यागत्वावच्छेदेनादृष्टार्थत्वं अंगत्वावच्छेदेन च दृष्टार्थत्वं अयाडग्निरयाट्सोम इत्यंगमंत्रे
सुवह्न्यादिदेवतास्मरणमेव व्यापारः तत्स्मरणांगकहोमस्यैव फलनिष्पादकत्वात् यद्वा द्रव्यपा
वच्छिन्नत्यागो होमस्तस्य क्रतुप्रतिपत्त्याकांक्षायां द्रव्यपरूपदृष्टफलकत्वं द्रव्यपस्यादृष्टफलक
त्वमेवं चावाहनस्य न तथात्वमसंभवात् तदेवमतिपीडनेन बाधकाभावे दृष्टार्थतालाघवमे
वेतद्देवतारेशरणामित्यलमेतेन॥ ॥ मनुः सुरापो ब्रह्महा गोघ्नः कृतघ्नो गुरुतल्पगः। एते पतं

त्ति सर्वेषु नरकेष्वनुपूर्वशः सुरापादीनां पतनकर्तृत्वावगतौ सुरापानादिविशिष्टपुरुषस्य तेन सं
बंधावगमात् तत्र विशेषणस्य सुरापानस्य सति संभवे हेतुत्वमवगम्यते ॥ स तस्मात् प्राजापत्या
न पशूनालभेतेत्यत्र प्रजापत्युद्देश्यकत्ववत् वारिदस्तृप्तिमाप्नोतीत्यत्र वारिदाने हेतुत्ववत् ।
विशेषणस्यौत्सर्गिकत्वात् । ननु कथं शब्दादवगतिरिति चेत् न शंय्वधिकरणविहितविशेषणत्वे
नत्तत्वात् । तथाहि शंयुर्बार्हस्पत्यः शंकल्याणं युनक्तीति योगात् देवाः शंयुमब्रुवन् त्वमि
हव्यं वह यो ऽस्मद्ध्याद्‌दाति स तेभागः प्रजानां च ते निःश्रेयसं स्यादित्युक्त्वा यो ब्राह्मणाया गुर
वेन्नं शतेन यादिति श्रुतौ यातनावगोरणयोः पौर्वापर्यबलात्कारणत्वमवगम्यते विशेष
णत्वेनोपस्थितत्वात् कारणांतरस्याश्रुतत्वात् कल्पने गौरवात् एवं शंयोः प्रजानिःश्रेयसहे
तुत्वं योगार्थस्य विशेषणत्वेनोपस्थितौ कारणाकांक्षापूरणक्षमत्वात् देवमतिपीडनेन लाघवमेवश
रणामित्यलमनेन ॥ ॥मनुः ऋत्विक्पुत्रो गुरुर्भ्राता भागिनेयोथ विट्पतिः एतैरेव हुतं यत्तु तद्धुतं स्वय

मेवहि । ननु प्रधानं स्वामी फलयोगात् गुणः प्रतिनिधिः परार्थत्वादिति परिभाषाबलात् यजमाने न प्र-
तिनिधिरिति चेन्न चेदं दूषणमत्र वाचनिकत्वात् किंच न यजमाने प्रतिनिधिरपि तु होमे तस्य गुणत्वात् दृष्टो-
त्सर्गहोमप्रतिनिधिवत् ऋत्विक् यागादौ वरणाभरणादिना संस्कृतः ऋत्विक्त्वाख्यसंस्कारविशेषस्य
तत्रैव संभवात् पुत्रादि प्रतिनिधिः निर्देशमात्रगोचरत्वात् पुत्रादेस्तत्राभिधानादन्यथा ऋत्विग्भेदात्
। वस्तुतो यत्र वाचनिकं सामर्थ्यं तत्रानुकल्पः अशिरस्कं भवेत्स्नानं स्नानाशक्तो तु कर्मिणामितिवत् य-
त्र तु सामर्थ्ये नोपादानं तत्प्रतिनिधिः सोमपूतिकावत् अन्यत्र विकल्पः व्रीहियववत् । तत्र पौर्वाप-
र्यबोधकाभावेन परंपराभावस्यानवच्छेदकत्वात् पाठक्रमस्यान्वये ऽतंत्रत्वात् ऋत्विजश्चासामर्थ्ये
नानुपादानादित्यलं विस्तरेण तत्र ऋत्विक्सर्वाधिकारी काम्ये यागादावेव तदुपादानात् प्रतिनि-
धिस्तु काम्ये नास्ति सर्वाङ्गशक्तस्य तत्राधिकारात् पुरोहिते तु वाचनिकं नित्ये नैमित्तिके काम्ये त्वे-
मे प्रतिनिधिर्भवेतीति विशेषाभिधानात् आरंभानंतरमसामर्थ्ये काम्येपि तदुपादानान्नित्यतु-
ल्यत्वात् ॥ नन्वेवं ऋत्विगादीनामुपादाने याजमानिकस्यागादेरपि तस्यैव विधेय इति चेन्न ।

तेषां स्वत्वाभावेन तदसंभवात् एवं मुंडनादिरप्यसाधारणो धर्मः तेनैवानुष्ठेयस्तस्य संस्कारकत्वा
त् ऋत्विगादीनां संस्कारानुपदेशात् फलार्थहविःरुपादानेन तदुपयोगात् संस्कारार्थत्वफलार्थ
त्वभेदेन कर्मकलापस्य द्वैविध्यात् विशेषस्तु चिंत्यते हविरादौ यथोक्तवस्त्वलाभे तु याह्यं तदनुकारि
यत् यवानामिव गोधूमा व्रीहीणामिव शालयः इत्युक्तदिशा तदुपादाने गोधूमस्यापि यवत्वेने
वाभिलापोऽवयवार्थवृत्तिद्वारा तत्सदृशोपादानमेव विध्यर्थः यवत्वेन फलसाधनत्वावगमो
पि यवादीनामसत्त्वेपि तदवयवविशेषस्यावांतरजात्यभावात् सादृश्यविशेषवतामेव विध्य
र्थत्वात् कात्यायनेनापि शाब्देऽविप्रतिपत्तिरित्यभिधानात् प्रतिनिधिविहिते द्रव्ये श्रुतशा
ब्दः प्रयोज्यः श्रुतद्रव्यबुद्ध्यैव तदुपादानादिति कर्कव्याख्यानात् अतएव सोमप्रतिनिधित्वेन प्राती
केषु सोमं पिबत इत्याधिकृतमंत्रपाठः अभावविधौ तु न तथा तथा पुष्पाणामप्यभावे तु पत्रैरपि समर्चयेत् पत्रा
णामप्यभावेपि फलान्यपि निवेदयेत् इत्यादौ तु पत्रत्वादिनैव फलसाधनत्वावगमात् तद्द्रव्यबुद्ध्या चाकरणा^
दित्यलं विस्तरेण

मनु ३ पिंडान्वाहार्यकं श्राद्धं अीणेनाजनिरास्यते वासनस्य तृतीयांशेनातिसंध्यासमीपतः। ननु वासनस्य तृतीय
भागे सायाह्नात्मके मुहूर्तत्रयस्य सर्वकर्मानर्हत्वात् तदन्यमुहूर्तद्वये श्राद्धपिंडपितृयज्ञयोरसंभवश्चेति चेत्। न।
कालेकर्मसमानत्वमकालेपि समापयेदिति। तंभकालनियमोयमनुदितेष्वधिकरणस्वनसात्। तथाहि। दर्शपू
र्णमासाभ्यां यजेतेत्यत्र पक्षादावेव कुर्वीत सदा पक्षादिकं त्वनुमितमनेन पक्षादितिथीनामेव दर्शादिकालत्वेनाभि
मतिः। पंचदश्यां चंद्रसत्वेनानंभाधिकारः कालाभावात् यस्य निरुप्तं हविनित्यादिना तदानंभे प्रायश्चित्तम्
पष्टेनैव विधानात् एवं स्वकाल एवानंभोधिकारापादकोनत्वकालेपीति। किंच उदितेजुहोति अनुदितेजुहोति
मानिमयाध्युषितजुहोतीति इत्यत्र शाखाभेदेन वैकल्पिकविधौ तदानंभकाल एव नियम्यते अन्यथासंभवात्
कालसोन्यात् न किंचिदेतत्। तदवमाति पीडनेनश्रानंभ एव कालांगता लाघवं शतणमंगवैगुण्येप्येवा
नाधिकानवीजमित्यलमनेन॥ ॥ वृसपुनाणे। अथ वेत्यां वृषोत्सर्गः कार्तिक्यां वाप्ययनेन ४। कर्तव्य
स्त्वथ नेव त्वां त्रिभिर्वर्णैर्द्विजातिभिः ४। ननु संपूज्येत्यादिवचनेन दंपतिपूजा वृषोत्सर्गयोः पौर्वापर्यं निय
मादत्रापि दंपतिपूजेति चेत्। न। तस्यार्थशौचात द्वितीयाहरूप सन्निहितत्वात् कि विशेषपनत्वात्। वृहतिस्तूय

अ० को०

३८

39

मानेसमुद्रंमनसाध्यायेत्‌. नथंतरेपृथिवीमित्यादौयागविशेषसंबंधित्वहत्सामजपादेःसमुद्रादिध्यानां
गत्वात्‌. आग्नेयीन्यायात्‌. तथाहि. आग्नेय्यागार्हपत्यमुपतिष्ठते इत्यत्राग्निदेवताकऋक्गार्हपत्योपस्था
नविनियुज्यते वाकीदेवताकानांचवकुलादनध्यवसायेसन्निहितायाएवऋचोविनियोजनंलाघवात्‌.
तद्वद्व्यक्तिवचनानांसन्निहितव्यक्तिविशेषपरत्वमुच्यतइतितदेकमातेर्पीउनेनलाघवमेवशरणमित
त्यमननन॥ ॥एकादश्यांनिराहारोभूत्वाहनिपरेह्यहं.भोक्ष्यामिपुंडरीकाक्षशरणंमेभवाच्युत।संक
ल्प्यैवंततोनाथौदेवदेवस्यसन्निधौ।जपेन्नारायणायनित्यपेदंशविधानतः॥नत्वेवंसंकल्पेत्यभिधा
नाद्दशम्यांवाकापाठएवसंकल्पइतिचेत्‌।न।तत्रसंकल्पपदस्यगौणत्वात्‌.अन्यथाकर्माधिकर
णाविनोधात्‌. तत्रहिकाम्यकामनाभिलापपूर्वकः कुरोतिलजलत्यागात्मकः संकल्पः शास्त्रीय
इत्युक्तं।मनसाइच्छतिवाचाभिलपतिकर्मणानिष्पादयतीतिक्रमबोधनात्‌।यद्यप्येवंसामा
न्येसर्वभूतेभ्योमयोत्सृष्टमिदंजलंवृत्तादौजलाशयोपंमयोत्सृष्टइत्येवसंकल्पःस्यात्‌.वाक्याभि

३

भिलापकालेऽउत्सर्गस्येच्छाविशेषस्यातीतत्वेनासमवेतार्थत्वाभावात्· इच्छानंतरमभिलापबोधनात्· प्रस्तुत
त्वेऽर्थस्यैवासमवेतार्थत्वसंभवात्· एवमेकोद्दिष्टेत्वंमयानिमंत्रितइत्यादौ निमंत्रणस्येच्छाविशेषरूपत्वात्
न चेच्छतीति परफलकामनापरं· न चेच्छतीति प[struck]नं तु दानादिरूपेच्छापरमिति वाच्यं· वि
शिष्टरूपत्वे बाधकाभावात्· इच्छाभिलापनिष्पादनां सामानाधिकरण्यश्रवणात् निष्पादस्यैवाभि
लापात्· तदपि न· मंत्रपाठानंतरं हविस्त्यागवदभिलापानंतरमिच्छाविशेषोपगमात्· सामानाधिकरण्य
स्य फलमादाय संभवात्· यदपि श्राद्धादिकर्मणि क्रमप्रत्ययस्तदपि न। लौकिकवाक्ये लक्षणा निषेधा
त्· स्वाम्नानेति न्यायात्· यथाश्रुति विहानेत्यस्य देवताघटनत्वात् तद्बोधकं च तद्धितादि तदुक्तं· तद्धिते
न चतुर्थ्या वा मंत्रलिंगेन वा पुनः। देवतासंगतिस्तत्र दुर्बलं चोत्तरोत्तरमिति· तदेवमुपस्थितक्रमाना
दरेण क्रमांतरकल्पने गौरवमित्यातिपीडनेन लाघवमेव रानयणमित्यलमनेन॥ ॥देवीपुराणे·
तीर्थश्राद्धं तु मर्त्यानां वाजनवर्जितं। श्वधांजगृह्य काकानां दृष्टेनैव द्रव्यवर्जितं॥ ननु तीर्थश्राद्धं मे पितॄन्

कर्तव्यं १

अ०को०

वृत्तिस्यादुपपदविभक्तेः कारकविभक्तिर्बलीयसीति न्यायादिति चेत् । न । आद्ये नैव सदा कार्यं कर्तव्यं
पित्र्ये तर्पणमित्यनेन यथाविधि निमित्तके तस्मिंस्तान्निषेधात् । न वा ऽऽहनस्य सन्निधिहेतुत्वेन तीर्थसदोष
त्वसन्निधिमिति देवतनत्वमिति चेत् न तस्यादृष्टार्थत्वात् । शानीनस्य वोढ्नस्य वा सन्निधाने देवताधि
करणे निरस्तत्वात् । तथाहि । देशनादेशितचतुर्थ्यन्तपदनिर्दिष्टरूपत्वं देवतात्वं तच्च शब्दरूपं शुद्धविशि
ष्टार्थरूपं वा उभयथाप्यचेतनं । न चाचेतनस्य तत्संभवः । न चैवं देवतानाम चैतन्ये देवताधिकरण[illegible]निषे
धविरोधः प्रसंगाभावादिति वाच्यं । ओष्ठ्याचेतन्यमंगीकृत्य तथात्वात् । यदि वा तत्र चैतन्यं तथापि विशिष्ट
विरोधस्य तेन विनापि संभवेन तदर्थत्वाभावात् । शानीनस्य नानायागेष्वेकदा संभवाच्च किंचिदेतत् ।
॥ ॥ मनुः । व्रतं निशामुखे ग्राह्यं बहिस्तारकदर्शने । सावित्रीमंत्रहोमश्च कर्तव्यः स्वयमन्वहं ।
न चैतद्वचनबलाद्व्रतमात्रे पूर्वदिवसरात्रौ संकल्पादरणमिति चेत् । न । प्रकरणे ऽस्य यथाऽपाय
श्चित्तपरत्वात् । न च तदपेक्षया वाक्यस्य बलवत्त्वमिति वाच्यं । एवं सति प्रकरणेन वाक्यनियमनं च

४०

पिनस्यात् वाक्यत्वेनैव बलवत्वात्· कथं तदा ज्योतिष्टोमोक्तमुपांशुत्वमस्यजान्वेति· पाविभाषिकत्वात्· न
नु वचनाद्द पुराणे वक्ष्ठुषु प्रेतेषु संकल्पाभिधानात् मूलकल्पने लाघवं बीजमिति न्यायात् सर्वस्यैव सायं संक
ल्पः गुर्वनुगमाद्यानवत्· तथाहि· नानायात्रासु गुर्वनुगमाभिधानात् मूलकल्पनालाघवेन यात्रामात्रे तद
नुगमबोधकश्रुत्यनुमानमिति सिद्धान्तः॥ यथा वा नानाव्रते षेकभुक्ताभिधानाद्व्रतमात्रांगताबोधकवेदानुमानं·
लाघवाद्दाधकाभावादिति चेन्न। नानाक्रसीनामसावेलासर्वकर्मसु गर्हितेति निषेधस्य वचनेनपरं बाधात्
श्चायाश्चिते तु तद्दाधे प्रमाणत्वात्· सर्वयात्रासु गुर्वनुगमेनकादिहानिरिति गुरुरनुगंतव्य इति विधावपि सर्वत्र
यात्रासु तद्दाधनस्य राद्धार्थत्वादिति न किंचिदेतत्। तदेवमतिपीडनेन लाघवमेवशान्तमित्यलमनेन॥ ॥कात्यायनः॥ मासिकार्थं व द्वादशाहं कृत्वा त्रयोदशेहनि सपिंडनं कुर्यात्। ननु त्काललेन समान
कर्तृकत्वलाभात् पंचमाद्दिमासानंतरं मृते ज्येष्ठश्राद्धलोपः स्यात् इति चेत्। न। कालाकांक्षामात्र प्रवृत्तत्वे
न कर्त्रैक्यस्याविवक्षितत्वात्· नचैवं सप्रदशावनाः सत्रमुपासीरन्नूयएव यजमाना स्तएव ऋत्विज इत्यत्र

ऋत्विगपचारेपि न ऋत्विगंतरकर्तृणां किंतु साम्युत्थानं अधिकारिलोपात्‌· अन्यथा तत्रापि तथात्वे आसह
स्रवर्षं सत्रमुपासीरन्निति सहस्रपदं मुख्यमेव स्यादिति चेत्‌। न। स्वगतफलकामस्याधिकारित्वेन तदभावे
तन्निवृत्तेः। अत्र पितृगतफलकामत्वस्य कनिष्ठेपि सत्वात्‌। न च संकल्परूपांगबाधान्न तद्वारेणान्यथा वै
फल्यादिति वाच्यं· नित्यधर्मग्रहानावपि फलसिद्धिरिति सर्वशास्त्रोनिरुक्तत्वात्‌· किंच प्रधानाधिकारि
णोंगेधिकारः सर्वज्येष्ठस्येति तन्मरणानंतरं कनिष्ठस्य ज्येष्ठत्वे नाधिकारः ऽप्राप्तः न च तदवरणां का
लाभावात्‌· इज्यावत्‌· अत एव प्रणीयपनिस्तीर्थंसुपक्रम्य याजकाप्येषु नित्यादिना प्रणयनोपक्रम पूर्ण
होमपर्यंतव्यापारकलापस्य समानकर्तृकत्वावगतावपि कर्ममध्ये ऋत्विगपचारेपि ऋत्विगंतरकर्तृ
तशेषनिष्पत्तिरिति लोकशास्त्रप्रसिद्धमेतत्‌· न चाधिकारिभेदकल्पनागौरवं· अनन्यगतिकत्वात्‌· त
देवमधिकारिमरणे तदनंतरकल्पनागौरवान्न दधिकरणोतिपीडनेन लाघवमेव शास्त्रणाक्षिप्तमनेन॥ ॥
पाशक्लन्काः। एकैकस्य तिलैर्मिश्रांस्त्रीन्‌ त्रीन्‌ दद्याज्जलांजलीन्‌। यावज्जीवकृतं पापं तत्क्षणादेव न
श्यति। न चेदं कामाधिकारिकमतः षट्पुरुषतर्पणानंतरं युज्यते। कामाधिकारस्य विलंबो पा...

तिकत्वात्·फलसापेक्षत्वात्·कामनाविलंबस्यापि भावात्·नित्याधिकारस्पर्शी ज्ञोपस्थितत्वात्·फलतैनेनपेक्षा
द्विविसिद्धांतादन्यथातद्विरोधादितिचेत्।न।वाचनिकत्वेनमध्येपितदाचरणात्।नन्वेवंयावज्जीवफलश्रुत्सोन
न्यतत्रानुबोधकत्वेनफलश्रुत्यनुवादोयुक्तः·कामाधिकारस्यैवबलवत्वात्·अतएवजातेष्टौपुत्रेजातेइत्यत्रपुत्र
स्यनिमित्तत्वश्रवणेपिकामाधिकारउक्तःइतिसमयप्रदीपलिखनविरोधइतिचेत्।न।भावानवबोधात्।नि
त्याधिकारस्पर्शीज्ञोपस्थितिकत्वेप्यन्यतत्राधिकारप्रसक्तौकामाधिकारस्यैवबलवत्वात्·फलवत्वेनगमी
यत्वाच्च·निष्फलात्सफलंगरीयइतिन्यायात्·किंचनिषेधप्रवृत्तांशेपिविधेरेवभावोहत्वंतत्राभावात्का
म्येतुविधित्वेनसाधनत्वावगमेपिनागादेवप्रवृत्तिसंभवात्·तदंशेविधेर्भावाभावात्·तदेवमतिपीडनेभो
पस्थितिलाघवमेवशरणमित्यलमनेन॥ ॥आपस्तंबः॥सर्वत्रैवनापिकर्तव्यंश्राद्धंवैनादृग्दर्शने।
अकुर्वाणस्तुतच्छ्राद्धंपंकेगौरिवसीदति·नचैतेननिंदार्थवादेनोपनागकालीनश्राद्धादेर्नित्यत्वमुक्तं·ए
वंचनादृग्दर्शनदत्तंहिश्राद्धमाचंद्रतारकमित्यादिफलाभिधानंस्तावकंनवास्तवमितिचेत्।न।संयोगपृथ

अ०कौ०

४२

42

त्वेनोभयरूपत्वसंभवात्· एकस्योभयरूपत्वे संयोगपृथक्त्वं तत्रभीतिसिद्धान्तात्· तथाहि· संयोगः संबंधः तस्य
पृथक्त्वं नानात्वं तत्सत्त्वे कर्म्मणोपि नानारूपत्वमनन्यथासिद्धोभयरूपत्वबोधकसत्वात्· यथा खादिरो यूपो
भवतीति यूपांगताबोधकसंबंधः अनंतनं खादिरं वीर्यकामस्येति श्रुतिर्वीर्यसाधनत्वं बोधयति अन्यथा त
दुपादानवैयर्थ्यात्· न च वा नित्यत्वेप्येवं· नित्यतां भंगप्रसंगात् तेषां तथैवासिद्धान्तात्· न चांगानां फलश्रुतिरर्थवा
दः यस्य पर्णमयी जुहूरित्यादाविवेति वाच्यं· तत्र जुहूलाभेपि द्रव्यविशेषपर्णवायकत्वेन पर्णपदस्य सार्थ
कत्वात्· पापश्लोकमित्यादेरनुवादत्वस्योचितत्वात्· न चात्र तथा खादिरत्वलाभेपुनः खादिरपदोपादानस्या
नन्यथासिद्धत्वात्· तदेवमनन्यथासिद्धबोधकसत्वे तस्यार्थान्तरादिपरत्वकल्पनागौरवादुष्टिपीडनेनत्वाद्युक्त
मेवरानणमित्यलमनेन॥ ॥मत्स्यपुराणे· तस्माद्दानाध्यगोविंदमुमापतिर्विनायको· महादानमवं कु
र्या द्विषे श्चैवानुमोदितः॥ न नु महादानं प्रदद्यादिति विधिबलान्महादानपदं द्रव्यविशेषवाचकं अन्यथा
दानक्रियाशक्तत्वेन दानक्रियाविधिविरोधादेवं च नाहर्शद्रव्यं फलसाधनं मुख्यं च भवेदितिचेद्वान।
तत्र महादानपदस्य यौगिकत्वात्· दीयतइति व्युत्पत्तिसंभवात्· कर्मविशेषे च महादानपदस्य रूढत्वं·

४२

अन्यथा गौणमुख्याधिकरणविरोधात् । तथाहि । मुख्यार्थानुपपत्तिमंतरेण यदुपस्थितिस्तदेव मुख्यं
अन्यथा उपस्थितिलाघवात् । तदनुपपत्तिपुरस्सरं यदुपस्थितिस्तदेव गौणं । गंगापदस्य प्रतीरादिवत् । अन्यथा
तद्विभागासंभवात् । एवं महाहानं परपेदित्यादावनुपपत्तिमंतरेण कर्मविशेषस्यैवोपस्थितिः । ननु द्रव्य
विशेषस्येति तत्पदं कर्मविशेषपरमेवोद्भिदादिवत् । यत्र तु तथा नवयानुपपत्तिमंतरेणोपस्थितिस्तत्र
नानार्थत्वं । सैंधवादिवत् । अन्यथा तु नानार्थत्वमयुक्तं गौरवात् । एवं यजमानः प्रस्तर इत्यादौ अपि द्र
ष्टव्यं । नच पदांतरकल्पनेनान्वयबाधो गौरवात् । तथाहि । अध्याहारः शेषोऽनुषंगः आवृत्तिश्चेति
तद्भेदाः ॥ तत्राध्याहारो नश्रूयमाणपदकल्पनमियानपंनमेदो यत्र शाब्दोर्थस्तेन विना नान्वयं लभते तत्रा
ध्याहारः ॥ पिधेहीत्यादौ द्वारमितिवत् । यत्रान्वयसंभवेपि नार्थसिद्धिस्तत्र शेषः । तावदेवास्य विनाभि
तिष्ठतो भोगेन ज्ञायितत्वेतिवत् । अंत्ययोस्तु श्रुतस्यैकत्राकृष्टस्य संबंधः ॥ तत्र व्यवहितेन पुनस्संबंधो नुषंगः ।

समाप्ते वाक्यार्थ इतियावत्· मध्याह्ने त्रिमुहूर्तः स्यादपराह्नस्ततःपरमित्यत्र त्रिमुहूर्तत्ववत्· स
न्निधिना वृत्तिः -- पंचपंचेतिवत्· शेषोऽनुषंगो व्याहारश्चावृत्तिर्भिन्नावेव भेदाविति केचित्· ॥ इदं
त्ववधेयं। रूढ्यर्थयोगार्थयोर्मुख्यत्वेऽपि रूढ्यर्थस्य बलवत्त्वं· शीघ्रोपस्थितिकेन तेनैवेतरपदार्थान्व
यात्। योगार्थस्य योग्यताज्ञानसापेक्षत्वेन विलंबितत्वात्· योगरूढ्यत्ततोऽपि बलवत्त्वं· यत्रस्य नसा
कांक्षयोः समानपदोपात्तयोस्तयोः प्रथममेवान्वयबोधसंभवात्· तन्निमित्तं रूढेर्योगापहारकत्वं
व्यक्तिवचनानां सन्निहितविशेष्यपरत्वं वेत्यन्यदेतत्· तद्युक्तं चियोगस्याभिप्रसंगे पंकजपदवत्· क्व
चिद्रूढ्यर्थस्य तैलादिपदवत्· क्वचित्तु प्रकरणादिबलेन योगार्थस्यैव बलवत्त्वं· यथाग्निर्वसुभिः सो
मो रुद्रैरिंद्रो मरुद्भिर्वरुण आदित्यैर्बृहस्पतिर्विश्वेदेवैरित्यत्र विश्वेदेवपदस्य विश्वपदवद्गण
शक्तत्वेऽप्यग्न्यादिसकलपरत्वं· प्रकरणात्तेषामेवोपस्थितिसंभवात्· तत्र तस्य तदितरोपस्थि
तिप्रतिबंधकत्वमिति सिद्धांतात्· पंकजपदादौ कुमुदतात्पर्यावगमे शक्त्यैवान्वयबोधो लक्ष

८३

णयावेतन्यत्र विस्तरः। दानं च स्वस्वत्वनिवृत्तिपरस्वत्वोत्पत्तिफलकेच्छाविशेषः· फलस्य विशेष
णत्वमुपलक्षणत्वं वेत्यन्यदेतत्· तदेव च पुरुषसूक्तजपांगकं महादानं· स्वेच्छाविशेषः संप्रदान
स्वीकारेणोपपद्यते· तस्य तत्कारणकत्वे तदनुमतेनैव व्यापानत्वात्· तदुत्तरकालीनः स्वीका
रस्य स्वत्वोत्पत्तिकारणे· एवं च नाशतो दानं स्वत्वध्वंस तदुत्पत्त्योरसंभवात्· न च इच्छाविशेषा
नं तन्नं यदा इच्छासमवधानं तदा तद्ध्वंसो विद्यमाने विद्यमानेन परस्वत्वोत्पत्त्यसंभवेनादृ
दानत्वस्य तत्राप्यावश्यकत्वादिति चेत्। न। तथापि उक्तप्रतिपत्तेः स्वत्वोत्पादकत्वेन तत्रादृ
ष्टदानत्वे मानाभावात्· न च प्रतिपत्तिं विनापि द्रव्यसंपत्त्यनंतरं निमित्तवाच्य· अस्तु तथापि पर
स्वत्वोत्पत्तौ स्वस्वत्वध्वंसस्यैव व्यापानत्वात्· स्वीकारमंतरेणेच्छाविशेषश्चोत्सर्गः· वृषोत्स
र्गादेः सर्वसिद्धत्वात्· ददद्रव्यमिलापश्च· तत्रापि ददातिर्मुख्य इति भट्टमतानुसारात्· वस्तुतः

समुत्सृज्यत इत्येवाभिलापो बाधकाभावात्। तदुक्तं प्रतिपत्तेरेव दानांगत्वं। तावतैव चकानकत्वं
तन्नैव च प्रधानपदं मुख्यमिति गुरुमतं वर्द्धिनः। स एव देवतोद्देश्यको यागः। स एव ज्ञेयावच्छिन्नो होमः।
वृषोत्सर्गादौ च यागपदं गौणं देवतोद्देश्यकत्वाभावात्। सर्वसत्वानामुद्देश्यत्वात्। वृषोत्सर्गे चोद्देश्या
त्वाभावात्। ननु यागोपि दानं देवतानाममति विदुषीनां स्वीकारासंभवादिति चेत्। न। तत्संभवेपि त
दुत्पादेमाना भावात्। इदं तु चिंत्यते बुद्धिविशेष एव दानादिकमस्तु प्रथमोपस्थितत्वात्। अनागतगो
चरत्वस्याभयत्राप्यावश्यकत्वादिति चेत्। न। मीमांसकानामनागतगोचरज्ञानासंभवेन क्ष
णुसरणात्। किं वेदं न मम्मेति न तदाकारस्तत्क्रमोच्छेदापातात् तत्तत्स्वत्वेस्वत्वाभावस्यावश्यक
त्वादिति नममेदमस्त्विति ताकारो वा नमः तथा वेच्छाविशेषस्यैव स्फुटत्वात्। तदेवमतिदीर्घेनेनान
न्यथासिद्धमुपस्थितिलाघवं शास्त्रार्थोपादानेरानणमित्यलमनेन॥ ॥मत्स्यपुराणे। श्री
कामः शांतिकामो वा ग्रहहोमं समाचरेत्। वृष्ट्यायुः पुष्टिकामो वा तथैवाभिचरन्नपि। ननु ग्रह

त्रिविशेषोपादानात्तेषामेव नवानां होमो न त्वाधिदेवतादीनामपि व्यापकाभावात् विशेषाभिधानाच्चेति चे
त् । न । यो यद्भक्तः कुर्यात् न्यायेन तेषामपि लाभात् । तथाहि · यो यद्भक्तो यत्पितृव्यानरूपः स तद्रूपेणैनं तर्पयेत्
तदुपादानत्वं पपकूत्वपत्नवैफल्यात् · मुख्यो वा येन पितृव्यानां नवयस्याप्यावश्यकत्वात् · सांगस्यैव तस्यापि वि
धिगोचरत्वात् · नचैवं पितृव्यानां तन्नाशेनामपि लाभः स्यादिति वाच्यं · यागांतरस्थानां तन्त्रेणासामवतत्वेनो
पादानात् · तदेवमातिपीडने नाविधित्वाल्लाभवमेव रामणोमित्यलं मननेन ॥ ॥ देवीपुराणे · तत्रापि महती
पूजा कर्तव्या पितृदैवते · अत्र तु पिंडप्रदानं तु ज्येष्ठपुत्री विवर्जयेत् · ननु पिंडदाननिषेधात् तन्मुखेन
श्राद्धस्यैव निषेधः । अंगहीनस्य प्रधानस्याकिंचित्करत्वात् · सांगाद्धि दिकादिति चेत् । न । वाविकतद्
गहानावपि मुख्यस्यातथात्वात् · गुणलोपेन मुख्यस्येति न्यायात् · गुणस्यांगस्यैकस्य न वलान्निरसने
पि मुख्यविनाशहेतोरभावात् · तत्र तदंगत्वस्यापि तद्बलेन संभवात् एवं सांगत्वस्याप्यविकल्प
त्वात् · अन्यथा श्राद्धं विवर्जयेदित्यभिधानप्रसंगात् · न चैवमंगत्वेन प्रधानविधिनापि न स्यादिति वाच्यं ·

अ०को०

४५

तत्र प्रधानेपि प्रकारान्तराभावेन तथात्वात्· फलचमसवत्· तथाग्नेय आवश्यकत्वादिति विशेषमपात्·
प्रकृते प्रधाननिषेधपरत्वे गौणत्वात्· क्वचिदंगनिषेधेन प्रधाननिषेधोप्यविधत्वे नयागनिषेधादि
वत्· न स्त्रीशुद्ध्यात्रानुपेतत्वात्पादिस्वनसात्· तदेवमतिपीडनेन लाघवमेवशानणामित्यलमनेन
॥ ॥मनुः॥ सकृत्तु कृतसंस्काराः सीमन्तेन द्विजस्त्रियः। यं यं गर्भं प्रसूयन्ते स सर्वः संस्कृतो भवेत्॥
सीमन्तस्यादिशिष्टाभिधानात् पुंसवनादावावृत्तिरिति केचित्। तन्न। स्त्रीसंस्कारात्पुत्रसंस्कार
कत्वाविशेषात् स्त्रीसंस्कारस्य प्रथमगर्भेनैव कृतत्वात्· स्मृतेर्न्यायमूलत्वसंभवतिमूलान्तरक
ल्पनागौरवात्· सकृत्संस्कृतानान्नीसर्वगर्भेषु संस्कृतेति स्मृतेरन्यायमूलत्वात्· आनंभनी
यवच्चिवत्। तथाहि· आग्नावैष्णवमेकादशकपालं निर्वपेद्दर्शपूर्णमासावारिप्समान इत्यनेन वि
हिताया आरम्भणीयेष्टेनाधिकारसंपादकत्वात्· सकृदेवतया तदेतदनुष्ठानं तावतैवाधिकार
निष्पादनात् प्रावृत्तेर्मानाभावात्· तदेवमतिपीडनेन लाघवमेवशानणामित्यलमनेन॥ ॥
वृद्धपुनाला· नित्युष्यवत्सुः पिण्डान् श्राद्धदः शिति नामतः। यसमानाद्वितिद्वाभ्यामाद्यं तु विभजेत्

४५

45

त्रिधा। एष एव विधिः पूर्वमर्घपात्रचतुष्टये· ननु पिंडार्थं कन्नादौ दैवात्रष्टेपि पिंडमेलनस्यासिद्धत्वात् पुनः
पाकान्तं भइति चेत् । न । अंगस्यानुष्ठानाप्रयोजकत्वात्· प्रधानार्थमनुष्ठितानामेवांगार्थत्वात्· तदनु
ष्ठानबाधमांत्रेन कल्पनागौरवात्· यत्किंचित् हविर्होमादिकर्म निर्वाहात्· वाजिनापचानन्वहं । तथाहि । तप्ते
पयसि दध्यानयति सा वैश्वदेव्यामिक्षा । वाजिभ्यो वाजिनमिति पत्राभिक्षायाउत्पन्नशिष्टत्वेन विश्वेदेवदेव
ताकत्वंगन्तव्यं । तत्र हि द्रव्यवाजिनस्यापि द्रव्यत्वात् तदुत्पत्ता भिल पत्राया विश्वेदेवदेवताकत्वं दोषाते·
तत्र कथं विद्यावाजिनापचाने वाजिनहोमविनैव तद्यागसिद्धिः । ननु वाजिनां तु नारंभः· कन्नारूपतामि
त्याकांक्षायानिम्नत्वात्· विश्वेदेवहोमस्यामिक्षयैव निष्पन्नत्वात्· नवाङ्गादेवोत्पत्तत्रतस्याङ्गत्वा
त्· तदंगमंतत्रेणापि वा तन्निष्पत्तेः नन्यगतिकत्वात्· कि विनानुष्ठानमसंत संयोगपृथक्त्वेनावश्य
कत्वावगमात्· पुष्कलिएषां दैवतुरन्यभिप्रितहोमसमिदपचानेसमिदंतन्कन्णवत्· नवात्योपिस
स्तपिंडक्रियां कृत्वा कुर्यादभ्युदयं ततः स्यादिर्वसान्मेलनमावश्यकमिति वाच्यं· श्राद्धावश्यकतापन्नत्वा
त्· तत्वेपि वा श्राद्धांते न पुनरनुष्ठानस्यावश्यकत्वात् । तदेवमतिपीडनेन लाघवमेवशरणमित्यलमनया ॥ ॥

अं० कौ०

५६

56

विष्णुः। कार्त्तिक्यामपूपान् दत्त्वा वृषमुत्सृजेत्· ननु क्त्वाबलेन पूर्वकालत्वावगमे पि कथं कालाध्यवसाय इ
तिचेत्। न। आनंतर्यवाचिक्त्वाबलेन वृषस्य नाप्यव्यवधानेनैव तत्कर्तव्यतावगमात्· आश्विनग्रहस्येव
त्· तथाहि· आश्विनग्रहं गृहीत्वा सवनीयपशुपुरोडाशेनेतीति श्रुतेः स्यपशूनालभेते तेनैव श्रवणाद्वाग्नी
षोमीयसवनीयानुबंध्यानां पशूनां सहालंभे प्राप्ते यदि तेषां यथापठितानां सहालंभः क्रियते तत्राश्विन
ग्रहणे सवनीयपशुपाकेन गौणयोगानंतर्यभंगः स्यात् तथा च तत्रोभयानुरोधात् आदावेवाश्विनग्रहणं
ततः सवनीयपशुपाकेनाग्नीषोमीयानुबंध्यपशुपाकनलाभमिति सिद्धांतः एवमाभ्युदयिकानंतरमेवा
पूपदानं· न च श्राद्धानंतरं दाननिषेधः· दत्वेत्वनेन दानस्याव्यवधानलाभेनानन्यगतिकत्वात्· न च वचन
तो व्यवधानं तथापीति वाच्यं· तस्य क्त्वालिंगलक्षव्यवसंस्कार न न कल्पनं वृषोत्सर्गांतर्गतत्वात्· श्राद्धस्या
गत्वे न भिन्नत्वात्· अन्यथा पूपदानादंगस्य प्रधानकालान्यकल्पनागौणत्वात्। तदेवमतिपीडनेन न
लाघवमेव दानेनाभिमलमनेन॥ ॥मत्स्यपुराणे॥ मासे नभस्यमावास्या तस्यां दर्भोच्चयो मतः। अ
यातयामास्ते दर्भा विनियोज्याः पुनः पुनः। नन्वेवं नभसि मासममावास्यासं विनेशुक्रो ग्रायातयामत्व

५६

निष्पन्नान्मासांतेनेति ध्यं तेनेप्ययातयामत्वं प्रसक्तमिति चेत्। न। समित्लुब्धकुशादीनां सेकालः समु
दाहृतस्तदनेन प्रत्यहं कुशाहरणविधानात्· मासांते नेति ध्यं तेन वा कुशसंचयस्य तदयातयामत्वस्य वा
बोधकाभावात्· निध्यं तेनप्ययातयामत्वं प्रसक्तमिति चेत्। न। नवानुष्ठानसौकर्यार्थमेव संचयः· प्रत्य
हं कुशाहरणविधिविरोधात्· नापि तेषामयातयामत्वं· विनियुक्तविधिविरोधात्· विशेषविधिं विना वि
नियुक्तस्य पुनर्विनियोगस्याकांक्षाविरहात्· बर्हिर्यागवत्· आकांक्षा न कल्पने गौरवात्· तदेवमाते
पीडनेन लाघवमेव शरणमिति सत्त्वमनेन॥ ॥गोभिलः· नात्रोल्मुकनिधानं नांजनाभ्यंजने· न प्रस्त
रेनास्तरणमिति निष्क्रमणं तदपात्रीनो वास्तव्यनिदध्यात्· स्तुवमित्यादनादित्यागनंपिनष्टीत्यादिना। प्रकृतौ स्त
गन्तपदेन तदभिधानात्· निष्क्रमणं नमो व इति मंत्रपाठः तदेव। न च षष्ठकार्यां प्रकृतौ बर्हिषि शिलां निधाय
स्तगंपिनष्टीत्यादिकमुक्तात द्विकृतौ पिंडपितृयज्ञे उल्मुकनिधानं किंमुदस्तं न द्विकृतिभूतं च पार्वणे
पिंडपितृयज्ञवदुपचारनृतिपार्वणे भिधानात् तेन तत्रापि नोल्मुकनिधानादिकमतिदेशबलात्। ननु
प्रत्यक्षपुनरणउपदेशादतिदेशबाध इति चेत्। न। बाध्यवैषम्यभयेनोपदेशस्य शाखांतरगोचरत्वात्·

विधिनिषेधयोरनेकत्वजत्वस्यत्वात्· नार्चर्यं गृह्णीतेत्यतिवत्· तथाहि· महापितृयज्ञेऽतिदेशप्राप्ते न धर्मजातेन हो
ता गृह्णाति नार्चर्यं गृह्णीत इति श्रुतं तत्र नात्यंतं वर्जनस्य विधिनिषेधौ विकल्पप्रसंगात्· एवं पर्युदासे नार्चवन
ण इत्यनितिक्त धर्मजातमस्ति इत्युपते अन्यथा वाक्यभेदापातात् नानुयाजेष्विति वत्· न चैवमपि नोल्मु
कनिधानमित्यत्र नोल्मुकनिधानस्यनागत्वबोधनमपि तूल्मुकानुदेशः पर्युदस्यते तस्मात्तदन्यधर्माति
देशः सिद्धस्तथैवं च उल्मुकनिधानाभावस्यानंगत्वात् अपार्वणातिदेश इति कथं वल्मुनाणपदेशेन समंवि
नोध शंकापीतिवत्। न। तथापि पिंडपितृयज्ञवदित्याविशेषितन्तुल्यताभिधानाविरोधेनोल्मुकनिधाना
पोहात् साधारणाभिधानकल्पनेगौरवात्· तदेवमतिपीडने न लाघवमेव शास्त्राणामित्यलमनेन॥ ॥
याज्ञवल्क्यः। आदित्यस्य सदा पूजां तिलकं स्वामिनस्तथा· महागणपतेश्चैव कुर्वन्सिद्धिमवाप्नुयात्· स्वामि
नः कार्तिकेयस्य· महागणपतेनिति महापदं प्रशंसापरं· महाभागेनवत्· वस्तुतस्तु महेन्द्रमिन्द्रं महेन्द्रवत्
महागणपतिर्देवतांतरमेव· स्तुतशस्त्रन्यायात्· स्तुतस्तोत्रं प्रशंसासंबंधः· गुणस्तुतावभिधात्वनुस
नात्· तद्यथा· इंद्रं स्तुवीतेति विधौ स्तुतिस्तावदनागम्यते· स्तुत्यनिष्ठलिंगात् एवं वस्तुतस्याविरोधे तद्वय

वपर्य्यवस्यति स्तुतिर्शानं· नतु सन्निहितमहेंद्रा व्ययः· तस्य महत्वा अपत्वे न भेदात्· स्तुवीतेत्यत्र संवंधिकार्य
जिज्ञासायामुपस्थितं इंद्र इन्नामक यागान्वयः। नवं इन्द्र महेंद्रयोन भेदः शब्दाभेदादिति वाच्यं· तदभेदेपि रूप
भेदाभेदाभ्यां नूपि भेदताभेदात्· वृटपरपोस्तु तथादर्शनात्· न वात्र तदभावः। इंद्रावधिक महत्वस्यैव इएवास
भवेन तदावरपकत्वात्· एवं च यो पेन महेंद्र स्तुति व शोकरा तिवाजपेयमहेंद्र स्तुते नपि श्रवणात्·॥ ॥देवी
पुराणे· अकाले प्यथवाकाले तीर्थश्राद्धं तु मानवैः। प्राप्तैनैव सदा कार्यं कर्तव्यं पितृतर्पणं· ननु पूर्वदिने
निनाभिषसकृद्भोजन रूपां गवाधात् कथं तदनुष्ठानं· नच तदपि पूर्वदिने कर्तव्यमेवेति वाच्यं· प्रधानक
र्तव्यतानिश्चयाभावेऽङ्गेन धिकारादिति चेत्तान। स्यषाङ्गिष्टेऽपि तत्संभवात्। तथाहि· यदि स्यषाङ्गि
बेन्न दर्शोपगम्यपा दिष्टवेडुकमाय द्वादशकपालं निर्वपेदित्यनेन विहितेष्टौ प्रकृतिवद्विकृतिरिति
त्पातिदेशेन दर्शानेकधर्माणां पूर्वदिनप्रातःकालीनहवनीयदेवतावाहनमपि प्राप्तं नत्वनविधीयते थो
भाविस्यपाङ्गेष संशयात् नैमित्तिके निमित्तवतोधिकारात्· प्रधानानधिकाने वांगेप्यनधिकारात्·

अ० को०

४८

उक्तादिनेप्रधानेधिकारेपिनतदनुष्ठानंपूर्वदिनस्यांगस्यबाधात्· इतीज्यायामावाहनंविनैवानुष्ठानं
तद्दृष्ट्वापिसंभवात्· नवांगबाधापत्त्याप्रधानांगबाधैवयुक्तेतिवाच्यं· अंगभूतस्यांगस्याकिंचित्क
रत्वेनायासगौरवात्· कश्चित्तुतादृशयागेतदावाहनस्यांगत्वमेवनास्त्यतएवज्योतिःशास्त्रादिनात
दवगमेपितदनुष्ठानेनेत्युक्तवान्· तदेवमतिपीडनेनलाघवमेवरमणीयमित्यलमनेन॥ ५

उक्तपुराणे· नित्यंनैमित्तिकंकाम्यंत्रिविधंस्नानमुच्यते तर्पणंतुभवेत्तस्यअंगत्वेनप्रकीर्ति
तं· काम्यंतीर्थस्नानादि। यत्तुकाम्यंपुष्यस्नानादितत्रत्वलौकिकंलौकिकांगमितितन्नतस्य
विनोधात्· तन्नावर्द्धकिः तद्वृत्ता विवेचनस्वतंत्रत्वं अंगकारणाभेद४।अलौकिकमनप
त्तितोपकारजनकमितिशेष४।तद्यथा· अग्निमन्थेइध्मवाडवंद्धव्य४पायसंब्रह्मणोभोजय
तव्यद्रूपतत्तदुभयंतथादाविंदवाडवंधनादिकमलौकिकमनंगंतद्धुन्यादृष्टंविनापितत्संभवात्·

४८

तद्धेतुत्वकल्पनागौरवात्· किंतु नैमित्तिकं तद्वत्त्वर्पणामपि लोकिकस्नानांगमनपेक्षितादृष्टजनकत्वा
त्· तदेवमतिपीडनेमलाद्युपमेव शानणमित्यलमनेन॥ ॥नत्वाकनेकल्पतनौ श्रीदत्तहरिनाथ
पा:। वाचस्पतौ निगूढंयनुल्पव[illegible]गुरुक्रमाल॥ हरिवनणारजस्वीनानतावेयशस्वी तरुणिमणिनपस्वी
सर्वकाले मनस्वी॥ विविदिषति बुधो यं दीपयामास सौ॥ सोममहोपदिष्टेन पथा संचनतो धुना। मीमांसा वि
षमानप्पेशानणमम भानती॥ इति महामहोपाध्याय तर्कपंचानन सङ्कुरश्रीदेवनाथकृताधि
करण कौमुदी समाप्ता॥ ॥शुभमस्तु॥ सं· १४··॥ श्री१॥ ॥ ॥

गनपत्राणि १।२।६।३७।३८।

व०४